কুশোপরি স্থাপয়েৎ। ততঃ উপমূললূনবর্হির্ভিরাগ্নেয়াদীশান্তং ব্রাহ্মণো হগ্নিপর্য্যন্তং নৈর্ঋতাদ্বায়ব্যান্তং অগ্নেঃ প্রণীতান্তং যাবৎ পরিস্তরেৎ। ততঃ উত্তরাস্যাং স্বসমীপাদারভ্য প্রাক্বং প্রাক্বং উত্তরাগ্রাণি দ্রব্যাণ্যর্থবদাসাদয়েৎ। তদ্যথা পবিত্রচ্ছেদনার্থং কুশত্রয়ং পবিত্রার্থং সাগ্রং গর্ভশূন্যং কুশপত্রদ্বয়ং প্রোক্ষণীপাত্রং আজ্যস্থালী চরুস্থালী দ্বয়ং উদূখলমূষলে দৃশদুপলে শূর্পঃ মেক্ষণং ব্রীহিযবৌ অভাবে শালয়ঃ তদভাবে তণ্ডুলাঃ। যবতণ্ডুলচূর্ণানি চ ক্ষীরং সম্মার্জ্জনকুশাঃ ষট্ উপযমনকুশাঃ সপ্ত সমিধস্তিশ্রঃ স্রুবঃ শ্রুক্ আজ্যং বৃষাঙ্কনার্থং দণ্ডোৎপলদণ্ডঃ অরুণগন্ধ কুঙ্কুমরূপঃ অলাভে হরিদ্রাচূর্ণং বৃষস্নানার্থম্। মুরামাংসীবচাকুষ্ঠং শৈলেয়ং রজনী দ্বয়ম্। শঠীচম্পকমুস্তঞ্চ সর্ব্বৌষধিগণঃ স্মৃতঃ ইত্যুক্ত মিলিতদ্রব্যাণি স্নানার্থং কলসদ্বয়ং মাল্যাদি পুষ্পাণি বৃষস্য কাঞ্চনশৃঙ্গে ২ কাঞ্চনবীরপট্টং ১ রজতক্ষুরাঃ ৪ দর্পণং ১ চামরং ১ লৌহঘণ্টা ১ তাম্রপৃষ্ঠং ১ কাংস্যক্রোড়ং ১ ৩৯
লৌহনূপুর চতুষ্টয়ং ৪ আচ্ছাদনার্থং বস্ত্রযুগং ২ বন্ধনার্থং বস্ত্রমেকং বৎসতরীবন্ধনার্থং বস্ত্রচতুষ্টয়ং ৪ তদলঙ্কারাণি। অশক্তৌ কাংস্যক্রোড়চতুষ্টয়ং ৪ লৌহবিদাহঃ দধিতিলাঃ গন্ধপুষ্পতাম্বূলানি গোপালকবস্ত্রং বিল্বৃক্ষযূপঃ উপযূপকাষ্ঠ চতুষ্টয়ং ব্রহ্মদক্ষিণা পূর্ণপাত্রং হোতৃদক্ষিণা কাঞ্চনবস্ত্র যুগকাংস্যানি বৃষোৎসর্গদক্ষিণা বৃষতুল্যবয়স্কো বৃষঃ অভাবে তন্মূল্যং বা। বৃষঃ বৎসতরী চতুষ্টয়ং এতান্যাসাদ্য মৌনী কুশপত্রদ্বয়ং প্রাদেশমাত্রং ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ। ইতি মন্ত্রেণ ছেদনকুশৈশ্ছিত্ত্বা ওঁ বিষ্ণোর্ম্মনসা পূতে স্থ ইতি প্রোক্ষণীপাত্রে নিধায় তত্র প্রণীতোদকং সংস্থাপ্য বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং পবিত্রাগ্রং দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং তন্মূলং ধৃত্বা প্রস্থীকৃত্য পবিত্রমধ্যেন ততঃ কিঞ্চিজ্জলং গৃহীত্বা বারত্রয়ং ভূমৌ ক্ষিপেৎ। ততো বামহস্ত-

তলে প্রোক্ষণীপাত্রং কৃত্বা সপবিত্র দক্ষিণহস্তেন প্রোক্ষণীজলাৎ কিয়জ্জলং বারত্রয়মুত্তোল্য পুনস্তত্রৈব প্রক্ষিপ্য তদুদকেনাসাদিত দ্রব্যাণি সকৃৎ প্রোক্ষয়েৎ। ততঃ প্রণীতাদক্ষিণে প্রোক্ষণীপাত্রং স্থাপয়েৎ। ততঃ আজ্যস্থালীং বামে হবতার্য্য তস্যামাজ্যং নিক্ষিপ্য শূর্পং পুরতো দক্ষিণভাগে সংস্থাপ্য তত্রোদূখলং ন্যস্য ব্রীহীন্ তদভাবে শালীন্ তণ্ডুলান্ বা আনীয় ওঁ অগ্নয়ে ত্বা জুষ্টং গৃহ্লামীত্যনেন মুষ্টিমেকাং গৃহীত্বা ওঁ অগ্নয়ে ত্বা জুষ্টং নির্ব্বপামীতি চরুস্থাল্যাং উদূখলে নিরূপ্য ওঁ অগ্নয়ে ত্বা জুষ্টং প্রোক্ষামীতি প্রোক্ষণীজলেন প্রোক্ষয়েৎ। এবং রুদ্রায় ত্বা ওঁ সর্ব্বায় ত্বা ওঁ পশুপতয়ে ত্বা ওঁ উগ্রায় ত্বা ওঁ অশনয়ে ত্বা ওঁ ভবায় ত্বা ওঁ ঈশানায় ত্বা ওঁ অগ্নয়ে স্বিষ্টিকৃতে ত্বা ইত্যাদি গ্রহণাসাদনপ্রোক্ষণানি কৃত্বা ব্রিস্তৃস্তীং কুর্য্যাৎ। ততো দক্ষিণহস্তোপরি ভাবেন মুষলেনাবহত্য শূর্পেণ প্রস্ফোট্য তণ্ডুলান্ কুর্য্যাৎ। এবং যবান্। অভাবে ব্রীহীন্ তদভাবে শালীন্ তদভাবে তণ্ডুলান্ পিষ্টচূর্ণানি বা আনীয় ওঁ পুংস্ত্বা ইত্যেকমুষ্টিগ্রহণাসাদানপ্রোক্ষণানি কৃত্বা এবং অগ্নয়ে স্বিষ্টিকৃতে ত্বা ইত্যনেন তথৈব কৃত্বা তণ্ডুলান্ পৃথগুভয়মপি প্রণীতোদকেন ত্রিঃ প্রক্ষাল্য যবতণ্ডুলান্ দৃশদুপলাভ্যাং পিষ্ট্বা চরুস্থালীদ্বয়ে তদুভয়ং নিধায় একত্র ক্ষৈরং পিষ্টরূপ পৌষ্ণ চরৌ তৎকোমলার্থং ঘৃতং দুগ্ধং প্রণীতোদকং পাকোচিতঞ্চ দত্ত্বা অগ্নেরুত্তরতো হঙ্গারান্ কৃত্বা তত্র ঘৃতমধিশ্রিত্য অগ্নিমধ্যে চরুং তদুত্তরে পৌষ্ণচরুং চাধিশ্রিত্য যথাবিধি শ্রপয়েৎ। পক্বং জ্ঞাত্বা জলদগ্নিং গৃহীত্বা আজ্যোপরি চরুদ্বয়োপরি চ দক্ষিণাবর্ত্তেন ভ্রমণরূপং পর্য্যগ্নিং কৃত্বা তমগ্নিং তত্রৈবাগ্নৌ প্রক্ষিপেৎ। ততো দক্ষিণহস্তেন শ্রুবমাদায় প্রাগগ্রমধোমুখমগ্নৌ তাপয়িত্বা সব্যে পাণৌ কৃত্বা দক্ষিণহস্তেন সম্মার্জ্জনকুশত্রয়েণ মূলাদগ্রপর্য্যন্তং সংশোধ্য প্রণীতোদকেন স্রুবমভ্যুক্ষ্য

পুনস্তথৈব প্রতপ্য উত্তরতঃ স্তরণোপরি নিদধ্যাৎ। এবং শ্রুক্‌মেক্ষণসংস্কারোঽপি। ততঃ সিদ্ধং চরুং জ্ঞাত্বা আজ্যস্থালী মাত্ম-
সম্মুখমবতার্য্য ওঁ সবিতুস্ত্বা প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ সূর্য্যস্য রশ্মিভিঃ। ইতি পবিত্রেণাজ্যমুত্তোল্য ওঁ সবিতুস্ত্বা
প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ সূর্য্যস্য রশ্মিভিঃ। ওঁ সবিতুর্ব্বঃ প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ বসোঃ সূর্য্যস্য রশ্মিভিঃ।
ইতি মন্ত্রাভ্যাং তদেবাবেক্ষ্য ওঁ সবিতুর্ব্বঃ প্রসব উৎপুনাম্যচ্ছিদ্রেণ পবিত্রেণ সূর্য্যস্য রশ্মিভিরিতি মন্ত্রেণ প্রোক্ষণী-
শ্চোত্তোল্য সংস্থাপ্য চরৌ ঘৃতশ্রুবন্দত্ত্বা আজ্যস্যোত্তরে চরুমবতার্য্য তদুত্তরে তথৈবাভিঘারিতং পৌষ্ণ চরুমবতারয়েৎ।
হোমসমাপ্তিং যাবৎ উপযমনকুশান্ বামহস্তেন গৃহীত্বা ওঁ পিঙ্গভ্রূশ্মশ্রুকেশাক্ষঃ পীনাঙ্গজঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ
সপ্তার্চ্চিঃ শক্তিধারকঃ। ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা বৃষোৎসর্গ হোম কর্ম্মণি অগ্নে ত্বং সাহস নামাসীতি নাম কৃত্বা ওঁ ভূর্ভুবঃ ৪০১
স্বঃ সাহস নামন্নগ্নে ইহাগচ্ছ আবাহ্য সংপূজ্য প্রজাপতিং মনসা ধ্যাত্বা প্রাগগ্রং সমিত্রয়ং ঘৃতাক্তমুত্তিষ্ঠন্নগ্নৌ ক্ষিপেৎ। তত উপবিশ্য
প্রোক্ষণ্যুদকেনাবচ্ছিন্নধারয়া প্রদক্ষিণমগ্নিং পর্য্যুক্ষ্য পবিত্রং প্রণীতাপাত্রে নিধায় প্রোক্ষণীপাত্রং তৎস্থানে স্থাপয়েৎ। ততো
দক্ষিণং জানু ভূমৌ পাতয়িত্বা ব্রাহ্মণো হ্যারম্ভপূর্ব্বকং শ্রুবেণাঘারাজ্যভাগৌ জুহুয়াৎ। প্রজাপতিং ধ্যায়ন্। ওঁ প্রজাপতয়ে
স্বাহা ইত্যনেন মনসা বায়ুকোণাদারভ্য অগ্নিকোণপর্য্যন্তং অগ্নৌ ঘৃতধারাং দদ্যাৎ। ইদং প্রজাপতয়ে। ইতি দেবতোদ্দেশঃ
পশ্চাৎ কুর্য্যাৎ। এবং সর্ব্বত্র। ওঁ ইন্দ্রায় স্বাহা ইত্যনেন নৈর্ঋত কোণাদারভ্য ঈশানকোণপর্য্যন্তং ঘৃতধারাং দদ্যাৎ। ইদ-
মিন্দ্রায়। এবং পশ্চাদ্দেবতোদ্দেশঃ। ওঁ অগ্নয়ে স্বাহা। অনেনাগ্নের্মধ্যদেশাৎ উত্তরতঃ পশ্চিমাদিপ্রাচ্যন্তাং ঘৃতধারাং দত্ত্বা

ইদমগ্নয়ে। ওঁ সোমায় স্বাহা। অনেনাগ্নের্মধ্যদেশাৎ দক্ষিণতঃ পশ্চিমাদিপ্রাচ্যন্তাং ঘৃতধারাং হুত্বা ইদং সোমায়। ততঃ সংস্রবান্ প্রোক্ষণীপাত্রে ক্ষিপেৎ। ততো হন্বারম্ভত্যাগঃ। ততো বাচস্পতিমিশ্রোক্ত ঋষ্যাদির্বোধ্যঃ। যথা ইহ রত্যাদীনাং চতুর্ণাং দেবা ঋষয়ঃ। অগ্নির্দেবতা যজুংসি ছন্দাংসি সত্রোত্থানে বিনিয়োগঃ। ওঁ ইহ রতি স্বাহা। ইদমগ্নয়ে। ইতি ঘৃতেন জুহুয়াৎ। ওঁ ইহ রমধ্বং স্বাহা ইদমগ্নয়ে। ওঁ ইহ ধৃতিঃ স্বাহা ইদমগ্নয়ে। ওঁ ইহ স্বধৃতিঃ স্বাহা ইদমগ্নয়ে। ওঁ উপসৃজন্ধরুণমিত্যাদি দ্বয়োর্দ্দেবাঋষয়োঽগ্নির্দেবতা সত্রোত্থানে বিনিয়োগঃ। ওঁ উপসৃজন্ধরুণং মাত্রে ধরুণং মাতরন্ধয়ন্ স্বাহা। ইদমগ্নয়ে। রায়স্পোষমস্মাসু দীধরৎ স্বাহা। ইদমগ্নয়ে। পূর্ব্ববৎ সংস্রবত্যাগঃ। ততঃ পায়সেনাবদানধর্ম্মেণ হোমঃ। যথা জুহ্বাং ঘৃতশ্রুবন্দত্ত্বা চরৌ চাপরং ঘৃতশ্রুবং দত্ত্বা চরোঃ পূর্ব্বার্দ্ধাৎ মেক্ষণেনাবদায় চরুং গৃহীত্বা জুহ্বাং ঘৃতশ্রুবন্দত্ত্বা চরুঞ্চাপরেণ ঘৃতশ্রুবেণাভিঘার্য্য ওঁ অগ্নয়ে স্বাহা ইদমগ্নয়ে। ইতি সমিদ্ধে হগ্নৌ জুহুয়াৎ। এবমেব ওঁ রুদ্রায় স্বাহা ইদং রুদ্রায়। ওঁ সর্ব্বায় স্বাহা ইদং সর্ব্বায়। ওঁ পশুপতয়ে স্বাহা ইদং পশুপতয়ে। ওঁ উগ্রায় স্বাহা ইদমুগ্রায়। ওঁ অশনয়ে স্বাহা ইদমশনয়ে। ওঁ ভবায় স্বাহা ইদং ভবায়। ওঁ মহাদেবায় স্বাহা ইদং মহাদেবায়। ওঁ ঈশানায় স্বাহা ইদমীশানায়। তথৈব মেক্ষণেন পৌষ্ণচরুমবদায়। পূর্ব্বার্দ্ধাৎ অবদানভূতেন পিষ্টকেন জুহুয়াৎ। ওঁ পূষা গা ইতি গোতম ঋষির্গায়ত্রীচ্ছন্দঃ পূষা দেবতা পৌষ্ণচরু হোমে বিনিয়োগঃ। ওঁ পূষা গা অন্বে তু নঃ পূষা রক্ষত্বর্ব্বতঃ পূষা রাজগুঁ সনোতু নঃ স্বাহা ইদং পূষ্ণে। ততো ব্রহ্মণো হন্বারম্ভং হুত্বা জুহ্বাং ঘৃতশ্রুবন্দত্ত্বা চরুদ্বয়েন ঘৃতশ্রুবদ্বয়ং দত্ত্বা উভয়োরেব পশ্চার্দ্ধাৎ ভূয়িষ্ঠং অবদা-

নদ্বয়ং মেক্ষণেন জুহ্বাং নিধায় তত্র ঘৃতশ্রুবদ্বয়ং দত্ত্বা ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইদমগ্নয়ে স্বিষ্টিকৃতে। ইত্যনেন জুহু-
য়াৎ। ততো ঽগ্নের্মধ্যভাগে আজ্যেন। প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা
ইদমগ্নয়ে। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভূবঃ স্বাহা। ইদং বায়বে। প্রজা-
পতির্ঋষিরনুষ্টুপ্ছন্দঃ সবিতা দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ইদং সূর্য্যায়। প্রজাপতির্ঋষির্বৃহতী-
চ্ছন্দঃ প্রজাপতির্দেবতা ব্যস্ত সমস্ত মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্বঃ স্বাহা ইদমগ্নিবায়ুসূর্য্যেভ্যঃ। ততো নবগ্রহহোমঃ।
ততঃ সর্ব্বপ্রায়শ্চিত্ত হোমঃ। ততঃ ওঁ অদ্যেত্যাদি অস্মিন্ বৃষোৎসর্গাঙ্গ হোমকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষপ্রশমনায় সর্ব্ব-
প্রায়শ্চিত্তহোমমহং করিষ্যামীতি সঙ্কল্প্য প্রায়শ্চিত্তহোমে ওঁ অগ্নে ত্বং বিধুনামাসীতি নাম কৃত্বাবাহ্য পূজয়িত্বা ওঁ 
ত্বন্নো ঽগ্নেরিত্যস্য বামদেব্যঋষিস্ত্রিষ্টুপ্ ছন্দোঽগ্নীবরুণৌ দেবতে প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ত্বন্নো ঽগ্নে বরুণস্য বিদ্বান্ দেবস্য
হেলো অবয়াসি সীষ্ঠাঃ যজিষ্ঠো বহ্নিতমঃ শোশুচানো বিশ্বান্ দ্বেষাংসি প্রমুমুগ্ধ্যস্মৎ স্বাহা। ইদমগ্নীবরুণাভ্যাম্। ওঁ স ত্বন্নো-
ঽগ্নে ইতি বামদেব্যঋষিস্ত্রিষ্টুপ্ছন্দো অগ্নীবরুণৌ দেবতে প্রায়শ্চিত্ত হোমে বিনিয়োগঃ। ওঁ স ত্বন্নোঽগ্নে বমো ভবো তীনে
দিষ্টৌ অস্যা উষসো ব্যুষ্টৌ। অবযক্ষ্মাণো বরুণগুঁ ররাণো বীহি মৃলীকগুঁ সুহবো ন এধি স্বাহা। ইদমগ্নীবরুণাভ্যাম্।
ওঁ অয়াশ্চাগ্নে ইতি প্রজাপতির্ঋষিঃ পঙ্ক্তিচ্ছন্দো ঽগ্নির্দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ অয়শ্চাগ্নে ঽস্যনভিশস্তিপাশ্চ সত্য-
মিত্যময়া অসি। ক্ষয়া নো যজ্ঞং বহাস্যয়া নো ধেহি ভেষজগুঁ স্বাহা। ইদমগ্নয়ে। ওঁ যে তে শতমিতি শুনঃ শেফঋষিস্ত্রিষ্টুপ্-

ছন্দো বরুণাদয়ো দেবতাঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ যে তে শতং বরুণং যে সহস্রং যজ্ঞিয়াঃ পাশা বিততা মহান্তঃ। তেভির্নোদ্য সবিতোত বিষ্ণুর্বিশ্বে মুঞ্চন্তু মরুতঃ স্বর্কাঃ স্বাহা। ইদং বরুণায় সবিত্রে বিশ্বেভ্যো দেবেভ্যো মরুদ্ভ্যঃ স্বর্কেভ্যঃ। ওঁ উদুত্তমমিতি শুনঃ শেফঋষিস্ত্রিষ্টুপ্‌ছন্দো বরুণাদয়ো দেবতা আজ্যহোমে বিনিয়োগঃ। ওঁ উদুত্তমং বরুণপাশমস্মদবাধমং বিমধ্যমগুঁ শ্রথায়। অথাবয়মাদিত্যব্রতে বয়ং তবানাগসোঽদিতয়ে স্যামঃ স্বাহা। ইদং বরুণায়। ততঃ ওঁ প্রজাপতয়ে স্বাহা ইদং প্রজাপতয়ে ইতি মনসা। ততশ্চ পূর্ণাহুত্যা ওঁ অগ্নে ত্বং মৃড়নামাসীতি নাম কৃত্বা আবাহাভ্যর্চ্চ্য ফলপুষ্পান্বিতং তাম্বূলং ঘৃতেন উত্তিষ্ঠন্ ওঁ মূর্দ্ধানং দিবো হরতিং পৃথিব্যা বৈশ্বানর মৃড় আজাতমগ্নিম্ কবিগুঁ সম্রাজমতিথিং জানানামা-সন্নাঃ পাত্রং জনয়ন্ত দেবাঃ স্বাহা ইদমগ্নয়ে। ইতি যজমানসহিতঃ পূর্ণাহুতিং দদ্যাৎ। ততস্তরণক্রমেণ বর্হিরুথাপ্য আজ্যেনা-ভিঘার্য্য ওঁ দেবা গাতু বিদো গাতু মিত্বা গাতু মিতঃ। বনস্পতে ইমং দেবযজ্ঞগুঁ স্বাহা বা তেধা। ইতি বর্হির্হোমং কুর্য্যাৎ। ততঃ সংস্রবং প্রাশ্যাচম্য বাচম্য। ওঁ সুমিত্রিয়া ন আপ ওষধয়ঃ সন্তু ইতি মন্ত্রেণ পবিত্রাভ্যাং শিরঃপ্রভৃতি মার্জ্জনম্। ওঁ দুর্মিত্রিয়াস্তস্মৈ সন্তু যো হস্মান্ দ্বেষ্টি যঞ্চ বয়ং দিষ্মঃ। ইত্যনেন প্রণীতোদকমৈশান্যাং পাত্রং ন্যুব্জং কৃত্বা নিনয়েৎ। ততো যজমানঃ কুশতিলজলান্যাদায় ওঁ অদ্যেত্যাদি কর্ত্তব্য বৃষোৎসর্গাঙ্গভূত হোমকর্ম্মণি কৃতৈতব্রহ্মকর্ম্মপ্রতিষ্ঠার্থং ইদং পূর্ণপাত্রং প্রজাপতিদৈবতং অমুক গোত্রায়ামুক দেবশর্ম্মণে ব্রাহ্মণায় ব্রহ্মণে তুভ্যমহং সম্প্রদদানি স্বার্থঙ্কেৎ সম্প্রদদে ইত্যনেন দদ্যাৎ। ইত্যুক্ত্বা প্রতিগৃহ্য স্বস্তীতি ব্রূয়াৎ। ততো ব্রহ্মপরিতোষকান্যৎ কিঞ্চিদত্ত্বা বস্ত্রযুগকাংস্যহিরণ্যাম্বুপানীয় কুশতিলজলা-

ন্যাদায় ওঁ অদ্যেত্যাদি কর্ত্তব্য বৃষোৎসর্গাঙ্গভূত কৃতৈতদ্ধোমকর্ম্ম প্রতিষ্ঠার্থমেতানি বস্ত্রযুগকাংস্যহিরণ্যানি বৃহস্পতিচন্দ্রমাবহ্নিদৈবতানি বিষ্ণুদেবতানি বা অমুক গোত্রায়ামুক দেবশর্ম্মণে হোত্রে তুভ্যমহং সম্প্রদদানি স্বার্থঞ্চেদ্দদে ইতি হোমদক্ষিণাং দদ্যাৎ। হোতা চ ওঁ কায়েণ প্রতিগৃহ্য স্বস্তীতি ব্রূয়াৎ। ততো যজমানস্তৎপ্রতিনিধিভূতো হোত্রাদির্ব্বা বৃষস্য দক্ষিণকর্ণে সমস্তং রুদ্রাধ্যায়ং জপেৎ। যথা রুদ্রাধ্যায়স্য পরমেষ্ঠী ঋষিরনুষ্টুপ্‌ছন্দো নমস্ত ইতি গায়ত্রীছন্দো যা তে যামিষুং শিবেন বচসা। ইতি তিসৃণাং অনুষ্টুপ্‌ছন্দো অধ্যবোচ অসৌ যোঽসৌ য ইতি তিসৃণাং পংক্তিছন্দো নমোঽস্ত্বিত্যাদি নমো নমস্ত ইত্যন্ত সপ্তানাং অনুষ্টুপ্‌ছন্দো মান ইতি দ্বিতীয়স্য কৌৎসঋষির্জগতীছন্দ একরুদ্রো দেবতা নমো হিরণ্যবাহবে ইত্যাদীনি যজূংষি বহুরুদ্রদৈবতানি দ্রাপেন্ধস ইত্যুপরিষ্টাদ্বৃহতীছন্দোঽন্ধসস্পতির্দেবতা ইমা রুদ্রায়েতি কৌৎসঋষির্জগতীছন্দো যা তে রুদ্র ইতি অনুষ্টুপছন্দঃ পরিণো মীঢুষ্টম ইতি ত্রিষ্টুপ্‌ছন্দো বিকিরিদ্রবিলোহিতস্য সহস্রাণি সহস্র ইত্যনুষ্টুপ্‌ছন্দো অসংখ্যাতা ইত্যাদি দশানামনুষ্টুপ্‌ছন্দো বহুরুদ্রো দেবতা নমোঽস্ত্বিতি ত্রীণি যজূংষি বহুরুদ্রদৈবতানি জপে বিনিয়োগঃ। ওঁ নমস্তে রুদ্র মন্যব উতোত ইষবে নমঃ। বাহুভ্যামুত তে নমঃ॥ ১ ॥ যা তে রুদ্র শিবা তনূরঘোরা পাপকাশিনী। তয়া নস্তন্বা সন্ত ময়া গিরিশন্তাভিচাকশীহি॥ ২ ॥ যামিষু গিরিশন্ত হস্তে বিভর্ষ্যস্তবে। শিবাং গিরি এতাং কুরু মাহিংসীঃ পুরুষং জগৎ॥ ৩ ॥ শিবেন বচসা ত্বা গিরিশাচ্ছাবদামসি। যথা নঃ সর্ব্বমিজ্জগদযক্ষ্মং সুমনা অসৎ॥ ৪ ॥ অধ্যবোচদধিবক্তা প্রথমো দৈব্যো ভিষক। অহীংশ্চ সর্ব্বাঞ্জম্ভয়ন্ সর্ব্বাশ্চ যাতুধান্যো ধরাচীঃ পরাসুবঃ॥ ৫ ॥ অসৌ

যস্তাম্রোঽরুণ উত বভ্রুঃ সুমঙ্গলঃ। যে চৈনং রুদ্রা অভিতো দিক্ষু শ্রিতাঃ সহস্রশো বৈষাগুঁ হেল ঈমহে॥ ৬ ॥ অসৌ
যোঽবসর্পতি নীলগ্রীবো বিলোহিতঃ। ইতৈনং গোপা অদৃশ্রন্নদৃশ্রন্নুদহার্য্যঃ সদৃষ্ঠো মৃড়য়াতি নঃ॥ ৭ ॥ নমোঽস্তু নীল-
গ্রীবায় সহস্রাক্ষায় মীঢ়ুষে। অথ যে অস্য সত্বানোঽহং তেভ্যোঽকরন্নমঃ॥ ৮ ॥ প্রমুঞ্চ ধন্বনস্ত্বমুভয়োরাত্ন্যোর্জ্যাম্। যাশ্চ
তে হস্ত ইষবং পরাতা ভগবো বপ॥ ৯ ॥ বিজ্যং ধনুঃ কপর্দ্দিনো বিশল্যো বানবাং উত। অনেশন্নস্য যা ইষব আভুরস্য
নিষঙ্গধিঃ॥ ১০ ॥ পরিতৌ ধন্বনো হেতিরস্মান্নৃণক্তু বিশ্বতঃ। অথো য ইষুধিস্তবারেঽস্মন্নিধেহি তম্॥ ১১ ॥ যা তে
হেতির্মীঢুষ্টম হস্তে বভূব তে ধনুঃ তয়াস্মান্ বিশ্বতস্ত্বমযক্ষ্মায়া পরিভুজঃ॥ ১২ ॥ অবতত্য ধনুষ্টৃগুঁ সহস্রাক্ষ শতেষুধে।
নিশীর্য্য শাল্যানাং মুখা শিরো নঃ সুমনা ভব॥ ১৩ ॥ নমস্ত আয়ুধায়ানাততায় ধৃষ্ণবে। উভাভ্যামুত তে নমো বাহুভ্যাং
তব ধন্বনে॥ ১৪ ॥ মানো মহান্তমুত মানো অর্ভকং মান উক্ষন্তমুত মান উক্ষিতম্ মানোঽবধীঃ পিতরং মোত মাতরং
মানঃ প্রিয়াস্তন্বো রুদ্র রীরিষঃ॥ ১৫ ॥ মানস্তোকে তনয়ে মানঃ আয়ুংষি মানো গোষু মানো অশ্বেষু রীরিষঃ। মানো
বীরান্ রুদ্র ভামিনোঽবধীর্হবিষ্মন্তঃ সদসি ত্বা হবামহে॥ ১৬ ॥ নমো হিরণ্যবাহবে সেনান্যে দিশাঞ্চ পতয়ে নমঃ
নমো বৃক্ষেভ্যো হরিকেশেভ্যঃ পশূনাং পতয়ে নমঃ। নমঃ শষ্পিঞ্জরায় ত্বিষীমতে পথীনাং পতয়ে নমঃ। নমো হরিকেশা-
য়োপবীতিনে পুষ্টানাং পতয়ে নমঃ॥ ১৭ ॥ নমো বভ্রুশায় ব্যাধিনেঽন্নানাং পতয়ে নমঃ। নমো ভবস্য হেত্যৈ জগতাং
পতয়ে নমঃ। নমো রুদ্রায়াততায়িনে ক্ষেত্রাণাং পতয়ে নমঃ। নমঃ সূতায় হন্ত্যৈ বনানাং পতয়ে নমঃ॥ ১৮ ॥ নমো রো-

হিতায় স্থপতয়ে বৃক্ষাণাং পতয়ে নমঃ। নমো ভুবন্তয়ে ঽবারিলস্কৃতায়ৌষধীনাং পতয়ে নমঃ। নমো মন্ত্রিণে বাণিজ্যায়
কক্ষাণাং পতয়ে নমঃ। নমঃ উচ্চৈর্ঘোষায় ক্রন্দয়তে পত্তীনাং পতয়ে নমঃ॥ ১৯ ॥ নমঃ কৃৎস্নায়তায় ধাবতে সত্ত্বানাং
পতয়ে নমঃ। নমঃ সহমানায় নির্ব্যাধিনে আব্যাধিনীনাং পতয়ে নমঃ। নমঃ ককুভায় নিষঙ্গিণে স্তেনানাং পতয়ে নমঃ।
নমো নিচেরবে পরিচরায়ারণ্যানাং পতয়ে নমঃ॥ ২০ ॥ নমো বঞ্চতে পরিবঞ্চতে স্তায়ূনাং পতয়ে নমঃ। নমো নিষঙ্গিণ
ইষুধীমতে তস্করাণাং পতয়ে নমঃ। নমঃ সৃকাযিভ্যো জিঘাꣳসদ্ভ্যো মুষ্ণতাং পতয়ে নমঃ। নমো নিচেরবে ঽসিমদ্ভ্যো নক্তঞ্চ-
রদ্ভ্যো বিকৃন্তানাং পতয়ে নমঃ॥ ২১ ॥ নম উষ্ণীষিণে গিরিচরায় কুলুঞ্চানাং পতয়ে নমঃ। নম ইষু মদ্ভ্যো ধন্বায়িভ্যশ্চ
বো নমঃ। নম আতন্বানেভ্যঃ প্রতিদধানেভ্যশ্চ বো নমঃ। নম আযচ্ছদ্ভ্যোঽস্যদ্ভ্যশ্চ বো নমঃ॥ ২২ ॥ নমো বিসৃজদ্ভ্যো বিধ্যদ্ভ্যশ্চ বো
নমঃ। নমঃ স্বপদ্ভ্যো জাগ্রদ্ভ্যশ্চ বো নমঃ। নমঃ শয়ানেভ্য আসীনেভ্যশ্চ বো নমঃ। নমস্তিষ্ঠদ্ভ্যোধাবদ্ভ্যশ্চ বো নমঃ॥ ২৩ ॥ নমঃ
সভাভ্যঃ সভাপতিভ্যশ্চ বো নমঃ। নমো ঽশ্বেভ্যো ঽশ্বপতিভ্যশ্চ বো নমঃ। নম অব্যাধিনীভ্যো বিবিধ্যন্তীভ্যশ্চ বো নমঃ। নম উগণা-
ভ্যস্তৃꣳহতীভ্যশ্চ বো নমঃ॥ ২৪ ॥ নমো গণেভ্যো গণপতিভ্যশ্চ বো নমঃ। নমো ব্রাতেভ্যো ব্রাতপতিভ্যশ্চ বো নমঃ।
নমো গৃৎসেভ্যো গৃৎসপতিভ্যশ্চ বো নমঃ॥ ২৫ ॥ নমো বিশ্বেভ্যো বিশ্বরূপেভ্যশ্চ বো নঃ। নমঃ সেনাভ্যঃ সেনানীভ্যশ্চ বো নমঃ।
নমো রথেভ্যো রথিভ্যশ্চ বো নমঃ। নমঃ ক্ষত্তৃভ্যঃ সংগ্রহীতৃভ্যশ্চ বো নমঃ। নমো মহদ্ভ্যোঽর্ভকেভ্যশ্চ বো নমঃ॥ ২৬ ॥ নমস্তক্ষভ্যো
রথকারেভ্যশ্চ বো নমঃ। নমঃ কুলালেভ্যঃ কর্ম্মারেভ্যশ্চ বো নমঃ। নমো নিষাদেভ্যঃ পুঞ্জিষ্ঠেভ্যশ্চ বো নমঃ। নমঃ শুনীভ্যো মৃগায়ুভ্যশ্চ

বো নমঃ ॥ ২৭ ॥ নমঃ শ্বভ্যঃ শ্বপতিভ্যশ্চ বো নমঃ। নমো ভবায় চ রুদ্রায় চ নমঃ। সর্ব্বায় চ পশুপতয়ে চ নমো নমো নীলগ্রীবায় চ শিতিকণ্ঠায় চ॥ ২৮ ॥ নমঃ কপর্দ্দিনে চ ব্যুপ্তকেশায় চ নমঃ। সহস্রাক্ষায় চ শতধন্বনে চ। নমো গিরিশায় চ শিপিবিষ্টায় চ নমো মীঢ়ুষ্টমায় চেষুধিমতে চ॥ ২৯ ॥ নমো হ্রস্বায় চ বামনায় চ নমো বৃহতে চ বর্ষীয়সে চ। নমো বৃদ্ধায় চ সবৃধে চ নমো হগ্র্যায় চ প্রথমায় চ॥ ৩০ ॥ নম আশবে চাজিরায় চ নমঃ শীঘ্রায় চ শীভ্যায় চ। নম উর্ব্বায় চাবশূন্যায় চ নমো নাদেয়ায় চ দ্বীপ্যায় চ॥ ৩১ ॥ নমো জ্যেষ্ঠায় চ কনিষ্ঠায় চ নমঃ পূর্ব্বজায় চাপরাজায় চ। নমো মধ্যমায় চাপগল্‌ভায় চ নমো জঘন্যায় বুধ্ন্যায় চ॥ ৩২ ॥ নমঃ শোভ্যায় চ প্রতিসর্য্যায় চ নমো যাম্যায় চ ক্ষেম্যায় চ। নমঃ শোক্ল্যায় চাবসন্যায় চ নম উর্ব্বর্য্যায় চ খল্যায় চ॥ ৩৩ ॥ নমো বন্যায় চ কক্ষ্যায় চ নমঃ শ্রবায় প্রতিশ্রবায় চ। নম আশুষেণায় চাশুরথায় চ নমঃ। শূরায় চাবভেদিনে চ॥ ৩৪ ॥ নমো বল্মিনে চ করচিনে চ নমো বর্ম্মিণে চ বরূথিনে চ। নমঃ শ্রুতায় চ শ্রুতসেনায় চ নমো দুন্দুভ্যায় চাহনন্যায় চ॥ ৩৫ ॥ নমো ধৃষ্ণবে চ প্রমৃশায় চ নমো নিষঙ্গিণে চেষুধিমতে চ। নমস্তীক্ষ্ণেষবে চায়ুধিনে চ নমঃ স্বায়ুধায় চ সুধন্বনে চ॥ ৩৬ ॥ নমঃ শ্রুত্যায় চ পথ্যায় চ নমঃ কট্যায় চ নীপ্যায় চ। নমঃ কুল্যায় চ সরস্যায় চ নমো নাদেয়ায় চ বৈশন্তায় চ॥ ৩৭ ॥ নমঃ কূপ্যায় চাবট্যায় চ নমো ইধ্যায় চাপত্যায় চ। নমো মেঘ্যায় চ বিদ্যুত্যায় চ নমো বর্ষ্যায় চাবর্ষ্যায় চ॥ ৩৮ ॥ নমো বাত্যায় চ রেষ্ম্যায় চ নমো বাস্তব্যায় চ বাস্তুপায় চ। নমঃ সোমায় চ রুদ্রায় চ নমস্তাম্রায় চারুণায় চ॥ ৩৯ ॥

নমঃ শঙ্করে চ পশুপতয়ে চ নমঃ উগ্রায় চ ভীমায় চ। নমোঽগ্রে বধায় চ দূরে বধায় চ নমো হন্ত্রে চ হনীয়সে চ॥ ৪০ ॥
নমো বৃক্ষেভ্যো হরিকেশেভ্যো নমস্তারায় নমঃ শম্ভবে চ ময়োভবে চ নমঃ শঙ্করায় চ ময়স্করায় চ নমঃ শিবায় শিবতরায় চ॥ ৪১ ॥ নমঃ পার্য্যায় চাবার্য্যায় চ নমঃ প্রতরণায় চোত্তরণায় চ। নমস্তীর্থ্যায় চ কুল্যায় চ নমঃ শষ্প্যায় চ ফেণ্যায় চ॥ ৪২ ॥ নমঃ সিকত্যায় চ প্রবাহ্যায় চ নমঃ কিংশিলায় চ ক্ষয়ণায় চ। নমঃ কপর্দ্দিনে চ পুলস্তিনে চ নমঃ ইরিণ্যায় চ প্রপথ্যায় চ॥ ৪৩॥ নমো ব্রজ্যায় চ গোষ্ঠ্যায় চ নমস্তল্প্যায় চ গেহ্যায় চ। নমো হৃদয্যায় চ নিবেষ্প্যায় চ নমঃ কাট্যায় চ গহ্বরেষ্ঠ্যায় চ॥ ৪৪ ॥ নমঃ শুষ্ক্যায় চ হরিত্যায় চ নমঃ পাংসব্যায় চ রজস্যায় চ। নমো লোপ্যায় চোলপ্যায় চ নম উর্ব্ব্যায় চ সূর্ব্ব্যায় চ॥ ৪৫ ॥ নমঃ পর্ণায় চ নমঃ পর্ণসদায় চ নমঃ উদ্‌গুরমানায় চাভিঘ্নতে চ নম আখিদতে ৪০
চ প্রখিদতে চ নম ইষুকৃদ্ভ্যো ধনুষ্কৃদ্ভ্যশ্চ বো নমঃ। নমো বঃ কিরিকেভ্যো দেবানাং হৃদয়েভ্যো নমো বিচিন্বৎকেভ্যো নমো বিক্ষিণৎকেভ্যো নম আনির্হতেভ্যঃ॥ ৪৬ ॥ দ্রাপে অন্ধসস্পতে দরিদ্রনীললোহিত। আসাং প্রজানামেষাং পশূনাং মাভের্ম্মারোঙ্ মাচ নঃ কিঞ্চ নাম মৎ॥ ৪৭ ॥ ইমা রুদ্রায় তপসে কপর্দ্দিনে ক্ষয়দ্বীরায় প্রভরামহে মতীঃ। যথা শমসদ্বিপদে চতুষ্পদে বিশ্বং পুষ্টং গ্রামেঽস্মিন্ননাতুরম্॥ ৪৮ ॥ যা তে রুদ্র শিবা তনূঃ শিবা বিশ্বাহ ভেষজী। শিবা রুতস্য ভেষজী তয়া নো মৃড় জীবসে॥ ৪৯ ॥ পরিণো হেতীরুদ্রস্য বৃজ্যাৎ পরিত্বেষস্য দুর্ম্মতীর্মঘী গাৎ। অবস্থিরামঘবদ্ভ্যস্তনুষ্মীঢ়স্তোকায় তনয়ায় মৃড়॥ ৫০ ॥ মীঢ়ষ্টম শিব মত শিবো নঃ সুমনা ভব। পরমে বৃক্ষ আয়ুধং নিধায় কৃত্তিং বসান

আচর পিনাকং বিভ্রদাগহি ॥ ৫১ ॥ বিকিরদ্রবিলোহিত নমস্তে অস্তু ভগবঃ। যাস্তে সহস্রগুঁ হেতয়োন্যমস্মিন্নিব পান্তু
তাঃ ॥ ৫২ ॥ সহস্রাণি সহস্রশো বাহ্বোস্তব হেতয়ঃ। তাসামীশানো ভগবঃ পরাচীনা মুখাকৃধি ॥ ৫৩ ॥ অসংখ্যাতা সহ-
স্রাণি যে রুদ্রা অধিভূম্যাম্। তেষাগুঁ সহস্রয়ো জনেঽবধন্বানি তন্মসি ॥ ৫৪ ॥ অস্মিন্মহত্যন্তবে অন্তরিক্ষে ভবা অধি।
তেষাগুঁ সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৫৫ ॥ নীলগ্রীবাঃ শিতিকণ্ঠা দিবগুঁ রুদ্রা উপশ্রিতাঃ। তেষাগুঁ সহস্রয়ো জনেব
ধন্বানি তন্মসি ॥ ৫৬ ॥ নীলগ্রীবাঃ শিতিকণ্ঠাঃ সর্ব্বা অধক্ষমাচরাঃ। তেষাগুঁ সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৫৭ ॥ যে
বৃক্ষেষু শষ্পিঞ্জরা নীলগ্রীবা বিলোহিতাঃ। তেষাগুঁ সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৫৮ ॥ যে ভূতানামধিপতয়ো বিশি-
খাসঃ কপর্দ্দিনঃ। তেষাগুঁ সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৫৯ ॥ যে পথাং পথিরক্ষিণঃ ঐলবৃদা আয়ুযুধঃ। তেষাগুঁ 
সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৬০ ॥ যে তীর্থানি প্রচরন্তি সৃকা হস্তা নিষঙ্গিণঃ। তেষাগুঁ সহস্রয়ো জনেব ধন্বানি
তন্মসি ॥ ৬১ ॥ যেঽন্নেষু বিবিধ্যন্তি পাত্রেষু পিবতো জনান্। তেষাগুঁ সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৬২ ॥ য এতা-
বন্তশ্চ ভূয়াগুঁসশ্চ দিশো রুদ্রা বিতস্থিরে। তেষাগুঁ সহস্রয়ো জনেব ধন্বানি তন্মসি ॥ ৬৩ ॥ নমোঽস্তু রুদ্রেভ্যো যে
দিবি যেষাং বর্ষমিষব তেভ্যো দশ প্রাচীর্দশদক্ষিণা দশ প্রতীচীর্দশোদীচীর্দশোর্দ্ধাঃ। তেভ্যো নমোঽস্তু তে নো মৃড়য়ন্তু তে
নো বন্তু তেয়ং দ্বিষ্মো যশ্চ নো দ্বেষ্টি তমেষাং জম্ভে দধ্মঃ ॥ ৬৪ ॥ যেঽন্তরীক্ষে যেষাং বাত ইষবঃ তেভ্যো দশ প্রাচী-
র্দশপ্রতীচীর্দশোদীচীর্দশোর্দ্ধাঃ। তেভ্যো নমোঽস্তু তে মৃড়য়ন্তু তে নোঽবন্তু তেয়ম্। দ্বিষ্মো যশ্চ নো দ্বেষ্টি

তমেষাং জম্ভে দধ্মঃ॥ ৬৫ ॥ নমোঽস্তু রুদ্রেভ্যো যে পৃথিব্যাং যেষামন্নমিষবঃ তেভ্যো দশ প্রাচীর্দশ দক্ষিণা দশ প্রতীচী-
র্দশোদীচীর্দশোর্দ্ধাঃ। তেভ্যো নমোঽস্তু তে নো মৃড়য়ন্তু তে নো বন্তু তেয়ং দ্বিষ্মো যশ্চ নো দ্বেষ্টি তমেষাং জম্ভে দধ্মঃ॥ ৬৬॥
ততোঽরুণগন্ধেন কুঙ্কুমরূপেণ হরিদ্রাচূর্ণেন বা দণ্ডোৎপলদণ্ডেন বৃষস্য প্রাঙ্মুখস্যাগ্নিসমীপস্থস্য দক্ষিণস্ফিচি ত্রিশূলং লিখেৎ।
তত্র মন্ত্রঃ। ওঁ মানস্তোকে তনয়ে মান আয়ুষি মানোগোষু মনোঽশ্বেষু রীরিষঃ। মানো বীরান্ রুদ্রভামিনোঽবধীর্হবিষ্মন্তঃ সদসি ত্বা
হবামহে। ততো বামপার্শ্বে চক্রং লিখেৎ। তত্র মন্ত্রঃ। ওঁ বৃষাঽসি ভানুনা ভাসি ভ্রামন্তং ত্বা হবামহে।
পবমানঃ স্বর্দৃশং। ততো বৃষমঙ্কয় ইত্যয়স্কারং ব্রূয়াৎ। অয়স্কাররূপগোপালস্তু সুধ্মাপিতলৌহেন তাবঙ্কৌ স্পষ্টয়েৎ।
অস্মিন্নবসরে অগ্নেরুত্তরত আচারাদ্যূপমারোপয়ন্তি তদ্বাহ্যে উপযূপচতুষ্টয়ঞ্চ। ততো বৎসতরীচতুষ্টয়সহিত বৃষমেভির্মন্ত্রৈঃ 
সুগন্ধি সর্ব্বৌষধিজলেন স্নাপয়েৎ। ততো মন্ত্রাঃ। ওঁ হিরণ্যবর্ণা ইত্যাদি ঋক্‌চতুষ্টয়স্যাগ্নির্ঋষিস্ত্রিষ্টুপ্‌ছন্দ আপো দেবতাঃ
স্নপনে বিনিয়োগঃ। হিরণ্যবর্ণাঃ শুচয়ঃ পাবকায়া সুজাতঃ কশ্যপো যাস্বিন্দ্রঃ। যা অগ্নিং গর্ভং দধিরে সুবর্ণাস্তা ন আপঃ
শংস্যোনাঃ সুহবা ভবন্তু। ওঁ যাসাং রাজা বরুণো যাতিমধ্যে সত্যানৃতে অবপশ্যঞ্জনানাম্। যা অগ্নিং গর্ভং দধিরে সুবর্ণাস্তা
ন আপঃ শংস্যোনা সুহবা ভবন্তু। ওঁ যাসাং দেবা দেবি কৃণ্বন্তি ভক্ষ্যং যা অন্তরীক্ষং বহুধা ভবন্তি। যা অগ্নিং গর্ভং দধিরে সুব-
র্ণাস্তা ন আপঃ শংস্যোনা সুহবা ভবন্তু। ওঁ শিবেন মা চক্ষুষা পশ্যতা আপঃ শিবয়া তন্বোপস্পৃশতত্বচম্মে ঘৃতশ্চ্যুতঃ শুচয়ো
যাঃ পাবকাস্তা ন আপঃ শংস্যোনাঃ সুহবা ভবন্তু। শন্নো দেবীরিতি মন্ত্রস্য দধ্যঙ্ঙাথর্ব্বণঋষির্গায়ত্রীচ্ছন্দ আপো দেবতা স্নপনে

বিনিয়োগঃ। ওঁ শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভিশ্রবন্তু নঃ। ততো ধৌতেন বাসসা জলমপনীয় গন্ধ-
পুষ্পাঞ্জলিসিন্দূরগোরোচনাদি দ্রব্যৈঃ সুবর্ণশৃঙ্গসুবর্ণবীরপট্টরৌপ্যক্ষুরাঃ ঘণ্টা ১ তাম্রপৃষ্ঠ ১ কাংস্যক্রোড় ১ দর্পণ ১ চামর ১ লৌহ-
নূপুরৈরর্ষমলঙ্কৃত্য বৎসতরীনপি তথালঙ্কৃত্য অশক্তৌ কাংস্যক্রোড়ৈর্বৎসতরীনলঙ্কৃত্য পঠেৎ। গায়ত্র্যা বিশ্বামিত্রঋষির্গায়ত্রী-
চ্ছন্দঃ সবিতা দেবতা জপে বিনিয়োগঃ। গায়ত্রীং জপেৎ। অঘমর্ষণসূক্তস্যাঘমর্ষণঋষিরনুষ্টুপ্ছন্দো ভাবব্রত্তো দেবতা অশ্ব-
মেধা বভৃথে বিনিয়োগঃ। ওঁ ঋতঞ্চ সত্যঞ্চাভীদ্ধাত্তপসো ঽধ্যজায়ত ততো রাত্র্যজায়ত ততঃ সমুদ্রোঽর্ণবঃ সমুদ্রাদর্ণবাদধি
সংবৎসরোঽজায়ত। অহোরাত্রাণি বিদধদ্বিশ্বস্য মিষতো বশী। সূর্য্যাচন্দ্রমসৌ ধাতা যথাপূর্ব্বমকল্পয়ৎ। দিবঞ্চ পৃথিবী-
ঞ্চান্তরীক্ষমথো স্বঃ। পুনরপি রুদ্রাধ্যায়ং জপেৎ। ততঃ পুরুষসূক্তং জপেৎ। ওঁ সহস্রশীর্ষেতি ষোড়শর্চ্চস্য নারায়ণঋষিঃ
পঞ্চদশর্চ্চস্যানুষ্টুপ্ছন্দঃ অন্ত্যস্য ত্রিষ্টুপ্ছন্দো জগদ্বীজমজঃ পুরুষো দেবতা জপে বিনিয়োগঃ। সহস্রশীর্ষা পুরুষঃ সহস্রাক্ষ
সহস্রপাৎ সভূমিগুঁ সর্ব্বতঃ স্পৃষ্ট্বা অত্যতিষ্ঠদ্দশাঙ্গুলম্॥ ১ ॥ পুরুষ এবেদগুঁ সর্ব্বং যদ্ভূতং যচ্চ ভাব্যম্। উতামৃতত্বস্যে-
শানো যদন্নেনাতিরোহতি॥ ২ ॥ এতাবানস্য মহিমা ঽতো জ্যায়াগুঁশ্চ পুরুষঃ পাদোঽস্য বিশ্বাভূতানি ত্রিপাদস্যামৃতং
দিবি॥ ৩ ॥ ত্রিপাদূর্দ্ধ্বং উদৈৎ পুরুষঃ পাদোঽস্যেহাভবৎ পুনঃ। ততো বিশ্বং ব্যক্রামচ্ছাশনানশনে অভি॥ ৪ ॥ ততো
বিরাড়জায়ত বিরাজোঽধিপুরুষঃ। স জাতোঽত্যরিচ্যত পশ্চাদ্ভূমি মথো পুরঃ॥ ৫ ॥ তস্মাদ্যজ্ঞাৎ সর্ব্বহুতঃ সম্ভৃতং
পৃষদাজ্যম্। পশুগুঁস্তাগুঁশ্চক্রে বায়ব্যা নারণ্যা গ্রাম্যাশ্চ যে॥ ৬ ॥ তস্মাদ্যজ্ঞাৎ সর্ব্বহুত ঋচঃ সামানি যজ্ঞিরে ছন্দাগুঁসি

যজ্ঞিরে তস্মাদ্যজুস্তস্মাদজায়ত ॥ ৭ ॥ তস্মাদশ্বা অজায়ন্ত যে কেচোভয়াদতঃ। গাবোহ যজ্ঞিরে তস্মাৎ তস্মাজ্জাতা অজাবয়ঃ ॥ ৮ ॥
তং যজ্ঞং বর্হিষি প্রৌক্ষন্ পুরুষং জাতমগ্রতঃ। তেনা দেবা অজায়ন্ত সাধ্যাশ্চ ঋষয়শ্চ যে ॥ ৯ ॥ যৎ পুরুষং ব্যদধুঃ কতিধা
ব্যকল্পয়ন্। মুখং কিমস্যাসীৎ কিম্বাহূ কিমূরূপাদাবুচ্যেতে ॥ ১০ ॥ ব্রাহ্মণোঽস্য মুখমাসীদ্বাহূ রাজন্যকঃ কৃতঃ। উরূ তদস্য
যদ্বৈশ্যঃ পদ্ভ্যাং শূদ্রো ঽজায়ত ॥ ১১ ॥ চন্দ্রমা মনসো জাতশ্চক্ষোঃ সূর্য্যো ঽজায়ত। শ্রোত্রাদ্বায়ুশ্চ প্রাণশ্চ মুখাদগ্নিরজা-
য়ত ॥ ১২ ॥ নাভ্যা আসীদন্তরীক্ষওঁ শীর্ষ্ণো দ্যৌঃ সমবর্ত্তত। পদ্ভ্যাং ভূমির্দিশঃ শ্রোত্রাত্তথা লোকান্কল্পয়ন্ ॥ ১৩ ॥
যৎ পুরুষেণ হবিষা দেবা যজ্ঞমতন্বত। বসন্তোঽস্যাসীদাজ্যং গ্রীষ্ম ইধ্মঃ শরদ্ধবিঃ ॥ ১৪ ॥ সপ্তাস্যাসন্ পরিধয়স্ত্রিঃ সপ্তসমিধঃ
কৃতাঃ। দেবা যদ্যজ্ঞং তন্বানা অবধ্নন্ পুরুষং পশুম্ ॥ ১৫ ॥ যজ্ঞেন যজ্ঞমযজন্ত দেবাস্তানি ধর্ম্মাণি প্রথমান্যাসন্। তেহ 
নাকং মহিমানঃ সচন্ত যত্র পূর্ব্বে সাধ্যাঃ সন্তি দেবাঃ ॥ ১৬ ॥ ততঃ কুষ্মাণ্ডীশ্চ জপেৎ। ওঁ যদ্দে বা দেবহেলনমিতি ঋক্-
ত্রয়স্য প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দোঽগ্নিবায়ুসূর্য্যা দেবতা জপে বিনিয়োগঃ। ওঁ যদ্দে বা দেবহেলনং দেবাসশ্চকৃমা বয়ম্।
অগ্নির্মা তস্মাদেনসো বিশ্বান্মুঞ্চত্বওঁ হসঃ ॥ ১ ॥ যদি দিবা যদি নক্তমেনাওঁসি চকৃমা বয়ম্। বায়ুর্মা তস্মাদেনসো বিশ্বা-
ন্মুঞ্চত্বংহসঃ ॥ ২ ॥ যদি জাগ্রদ্যদি স্বপ্ন এনাওঁসি চকৃমা বয়ম্। সূর্য্যো মা তস্মাদেনসো বিশ্বান্মুঞ্চত্বওঁ হসঃ। ততো
বৃষস্য দক্ষিণকর্ণে জপেৎ। পিতা বৎসানামিতি প্রজাপতির্ঋষিঃ পংক্তিছন্দো বৃষো দেবতা জপে বিনিয়োগঃ। ওঁ পিতা
বৎসানাং পতিরঘ্ন্যানামথো পিতা মহতাং গর্গরাণাং গর্ভো জরায়ুঃ প্রতিধুকপীযূষমামিক্ষা ঘৃতং তত্বস্য রেতঃ। ওঁ বৃষোঽসি

ভগবান্ ধর্ম্মশ্চতুষ্পাদঃ প্রকীর্ত্তিতঃ। বৃণোমি তমহং ভক্ত্যা স মাং রক্ষতু সর্ব্বতঃ। ততো যূপে বৃষং উপযূপে পূর্ব্বাদি-
ক্রমেণ বৎসতরী চতুষ্টয়ং চ বাসোভির্ব্বধ্নীয়াৎ। ততো যজমানঃ। ওঁ সোপকরণ বৎসতরীচতুষ্টয় সহিত বৃষায় নমঃ। ইত্যনেন
পাদ্যাদিভিঃ সংপূজ্য কুশতিলজলান্যাদায় ওঁ তৎসদিত্যুচ্চার্য্য। হে বৎসতর্য্যো বো যুষ্মাকং এনং পতিং স্বামিনং যুবানং
তরুণং দদামি ত্যজামি ত্যক্তুং প্রার্থয়ামি তেন বৃষেণ সহ ক্রীড়ন্তীঃ খেলন্ত্যশ্চরথ ভ্রমথ তে বৎসতর্য্যো যূয়মপি মা নঃ।
নাস্মৎসত্ত্ববিষয়া ভবিষ্যথ কিন্তু ময়া ত্যক্তব্যা বয়ং বৃষস্য ভবতীনাঞ্চত্যাগেন রায়স্পোষেণ ধনসমৃদ্ধ্যা সাপ্তজনুষা সপ্ত-
জন্মব্যাপকেন ইষা অন্নেন সম্মদেম হৃষ্টা ভবেম সুভগা লোকস্য প্রিয়াঃ। ইত্যর্থং জ্ঞাত্বা এনং যুবানমিত্যস্য যাজ্ঞবল্ক্য
ঋষিস্ত্রিষ্টুপ্ ছন্দো গাবো দেবতা বৃষোৎসর্গে বিনিয়োগঃ। ওঁ এনং যুবানং পতিং বো দদামি তেন ক্রীড়ন্তীশ্চরথ প্রিয়েণ
মানঃ সাপ্তজনুষা সুভগা রায়স্পোষেণ সমিষা মদেম। ইত্যুচ্চার্য্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো
২শৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ প্রেতত্ববিমুক্তিপূর্ব্বক স্বর্গলোকগমনকাম ইমং রুদ্রদৈবতং
সোপকরণ বৎসতরী চতুষ্টয়সহিতং বৃষমুৎসৃজামি। স্বার্থকেতুৎসৃজে। তদুৎসর্গজলং পঞ্চানামপি পুচ্ছেষু দদ্যাৎ। ততো
বৎসতরী চতুষ্টয় সহিত বৃষায় নম ইত্যনেন পাদ্যাদিভিঃ পূজয়েৎ। ইতি পিতৃভক্তিতরঙ্গিণী। ততো
বৎসতরী চতুষ্টয় সহিত বৃষামামন্ত্রয়েৎ। ওঁ ময়ো ভূরিত্যাদি যজুষাং দেবা ঋষয়ো বায়ুর্দ্দেবতা রুচন্নো ইত্যস্য
দেবা ঋষয়োঽনুষ্টুপ্ ছন্দো ঽগ্নির্দ্দেবতা তত্বায়ামিত্যস্যাঃ শুনঃ শেফঋষিস্ত্রিষ্টুপ্ছন্দো বরুণো দেবতা। স্বর্ণধর্ম্ম ইত্যাদীনাং

পঞ্চানাং যজুষাং দেবা ঋষয়োঽগ্নির্দেবতা বৎসতরীমধ্যস্থ বৃষামন্ত্রণে বিনিয়োগঃ। ময়ো ভূরভি মা বাহি স্বাহা। মারুতোঽসি মরুতাঙ্গণঃ। শম্ভূময়ো ভূরভি মা বাহি স্বাহা। ওঁ অবস্যুরসিদুরস্বান্ শম্ভুর্ময়ো ভূরভি মা বাহি স্বাহা। ওঁ যাস্তে অগ্নে সূর্বরুচো দিবমাতন্বন্তি রশ্মিভিঃ। তাভির্নোঽদ্য সর্ব্বাভী রুচে জনায় নস্কৃধি। যা বো দেবাঃ সূর্য্যে রুচো গোষশ্বেষু যা রুচঃ। ইন্দ্রাগ্নী তাভিঃ সর্ব্বাভী রুচং নো ধত্ত বৃহস্পতেঃ। রুচং নো ধেহি ব্রাহ্মণেষু রুচং রাজসু ন স্কৃধি রুচং বৈশ্যেষু শূদ্রেষু ময়ি ধেহি রুচারুচং তত্ত্বা যামি ব্রাহ্মণা বন্দমানস্তদা শাস্তে যজমানো হবির্ভিঃ। অহেড়মানে বরুণেহাবাধ্যুরণং সমান আয়ুঃ প্রমোষীঃ। স্বর্ণধর্ম্মঃ স্বাহা স্বর্ণার্কঃ স্বাহা স্বর্ণশুক্রঃ স্বাহা স্বর্ণজ্যোতিঃ স্বাহা স্বর্ণমুর্য্যঃ স্বাহা। ততঃ প্রণমেৎ। ততো বন্ধাৎ প্রমুচ্য ঐশান্যাং দিশি কিঞ্চিচ্চালয়েৎ। ততঃ প্রাচীনাবীতী দক্ষিণামুখ আচারাৎ বৃষপুচ্ছজলেন তর্পয়েৎ। দ্বিগুণঃ 
ভুগ্নকুশতিলজলসহিতং বৃষপুচ্ছমাদায় দক্ষিণাগ্রকুশত্রয়োপরি অমুক গোত্র প্রেত অমুক দেবশর্ম্মন্নেতত্তে সতিল বৃষপুচ্ছগলিতোদকেন তৃপ্যস্বেতি ত্রিস্তর্পয়েৎ। পুনস্তথৈব জলেন স্বধা পিতৃভ্যো মাতৃভ্যো বন্ধুভ্যশ্চাপি তৃপ্তয়ে। মাতৃপক্ষাশ্চ যে কেচিদ্যে চান্যে পিতৃপক্ষজাঃ। গুরুশ্বশুরবন্ধূনাং যে কুলেষু সমুদ্ভবাঃ। যে প্রেতভাবমাপন্না যেচান্যে শ্রাদ্ধবর্জ্জিতাঃ। বৃষোৎসর্গেণ তে সর্ব্বে লভন্তাং প্রীতিমুত্তমাম্। ইতি মন্ত্রৈরঞ্জলিত্রয়ং দদ্যাৎ। ততো বৎসতরী চতুষ্টয় সহিতং বৃষং প্রদক্ষিণীকৃত্য। ওঁ ধর্ম্মোঽসি ত্বং চতুষ্পাদশ্চতস্রস্তে প্রিয়স্ত্বিমাঃ। চতুর্ণাং পোষণার্থায় ময়োৎসৃষ্টা ত্বয়া সহ। দেবানাঞ্চ পিতৃণাঞ্চ মনুষ্যানাঞ্চ যোষিতঃ। ভূতানাং তৃপ্তিজননাস্ত্বয়া ব্রজন্তি মাঃ। ওঁ নমো ব্রাহ্মণ্যদেবেশ পিতৃভূতর্ষিপোষক। ত্বয়ি মুক্তেঽক্ষয়া লোকা

মম সন্তু নিরাময়াঃ। ওঁ মা মে ঋণোঽস্তু দৈবোঽথ পিত্রো ভৌতো ঽথ মানুষঃ। ধর্ম্মস্ত্বং ত্বৎপ্রপন্নানাং যা গতিঃ সাস্তু মে ধ্রুবা। যৎকিঞ্চিদ্দুষ্কৃতং কর্ম্ম লোভমোহকৃতৈর্ভবেৎ। তস্মাদুদ্ধৃত্য দেবেশ পিতুঃ স্বর্গং প্রযচ্ছ মে। যাবন্তি সন্তি রোমাণি তব তাসাঞ্চ গোপতে। তাবদ্বর্ষসহস্রাণি স্বর্গে বাসোঽস্তু মে পিতুঃ। ওঁ পুণ্যক্ষয়াদিহাগত্য পিতা মে সর্ব্বধর্ম্মবিৎ। দশজন্মনি বিপ্রত্বং প্রাপ্য শ্রৌতক্রিয়ারতঃ। ততঃ প্রক্ষীণকর্ম্মাসৌ মোক্ষমাপ্নোত্বসংশয়ম্। ওঁ মোচিতোঽসি ময়া নাথ স্বচ্ছন্দা গতিরস্তু তে। মৎপিতুঃ স্বর্গসিদ্ধ্যর্থং তরিতুং ভবসাগরে। ততো যথেষ্টং যূথং পর্য্যট। ওঁ ন খাদেঃ পরশস্যানি নাক্রামে গর্ভিণীঞ্চ গাম্। ইতি পঠিত্বা বৃষং মুঞ্চেৎ। ততো বৃষবৎসতরীণামলঙ্কারং বাসোযুগং আচার্য্যায় দদ্যাৎ। সর্ব্বত্র মন্ত্রপাঠে ব্রাহ্মণেভ্যঃ শূদ্রস্তু নম ইতি বদেৎ। ততো দক্ষিণা। ওঁ অদ্যেত্যাদি কৃতৈতদ্বৃষোৎসর্গকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিমং বৃষং ১১৩
রুদ্রদৈবতং তন্মূল্যং বা বিষ্ণুদৈবতং অমুক গোত্রামুক দেবশর্ম্মণে ব্রাহ্মণায়াচার্য্যায় তুভ্যমহং সম্প্রদদানি। ইত্যুৎসৃজ্যাচার্য্যায় দদ্যাৎ। স্বার্থক্ষেদ্দদে ইতি বিশেষঃ। আচার্য্যাগ্রহণে অন্যস্মৈ ব্রাহ্মণায় দদ্যাৎ। ততো বৃষাঙ্ককর্ত্রে বেতনং দদ্যাৎ। ব্রাহ্মণানাহ। যৎকিঞ্চিদ্বিজনে হরণ্যে ময়োৎসৃষ্টন্তু নির্জ্জনে। তৎ কশ্চিদন্যো ন নয়েদ্বিভাজ্যঞ্চ যথাক্রমম্। ন বাহ্যং নচ তৎ ক্ষীরং পাতব্যং কেনচিৎ ক্বচিৎ। ইতি ব্রাহ্মণান্ নিয়মং শ্রাবয়েৎ। ততোঽচ্ছিদ্রমবধারয়েৎ। ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততম্। ইতি বিষ্ণুং স্মরেৎ। কীর্ত্তয়েচ্চ। ওঁ গচ্ছধ্বমমরাঃ সর্ব্বে গৃহীত্বার্চ্চাং স্বমালয়ম্ সন্তুষ্টা বরমস্মাকং দত্ত্বেদানীং সুপূজিতাঃ। ইতি বিষ্ণুধর্ম্মোত্তরীয়ং পঠিত্বা বিসৃজেৎ। ততঃ প্রীয়তাং পুণ্ডরীকাক্ষঃ

সর্ব্বযজ্ঞেশ্বরো হরিঃ। তস্মিংস্তুষ্টে জগত্তুষ্টং প্রীণিতে প্রীণিতং জগৎ। ইতি মৎস্যপুরাণোক্তং পঠেৎ। ততঃ ঋচং বাচয়িত্যাদিনা
শান্তিং কৃত্বা তদজ্ঞানে গায়ত্র্যা শান্তিং কৃত্বা দশান্যূন ব্রাহ্মণেভ্যো ভোজ্যানি দদ্যাৎ ॥ * ॥ * ॥
॥ * ॥ * ॥ ইতি যজুর্ব্বেদি বৃষোৎসর্গং সমাপ্তং ॥ * ॥ * ॥

যজুর্ব্বেদিনাং চতুর্থাশান্তিঃ ॥ * ॥ সা যথা। সুপ্রক্ষালিতপাণিপাদ আচাম্য সংযত ব্রাহ্মণেন চতুর্থা [illegible] কারয়েৎ ॥ তত্রায়ং প্রয়োগঃ ॥ * ॥ অগ্নিং প্রজ্বাল্য ব্রাহ্মণান্ স্বস্তি বাচয়িত্বা পাত্রচতুষ্টয়ে জলং সংস্থাপ্য [illegible] হস্তং দত্ত্বা গায়ত্রীং পঠেৎ। ওঁ শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভিস্রবন্তু নঃ। ওঁ স্যোনা পৃথিবী ভবা-নৃক্ষরা নিবেশনী যচ্ছানঃ শর্ম্ম সপ্রথাঃ। ওঁ আপোহিষ্ঠা ময়ো ভুব স্তান উর্জ্জে দধাতন মহেরণায় চক্ষসে। ওঁ যো বঃ শিবতমোরসস্তস্য ভাজয়তেহ ন উষতীরিব মাতরঃ। ওঁ তস্মা অরঙ্গমাম বো যস্য ক্ষয়ায় জিন্বথ আপো জনয়থা চ নঃ। ওঁ দ্যৌঃ শান্তিরন্তরীক্ষং শান্তিঃ পৃথিবী শান্তিরাপঃ শান্তির্ব্বনস্পতয়ঃ শান্তিঃ শান্তিরেব শান্তিঃ। পুনর্গায়ত্রীং পঠেৎ। অপর-স্মিন্ পাত্রে হস্তং দত্ত্বা গায়ত্রীম্ ॥ ১ ॥ ওঁ শন্নো দেবীরিতি। ওঁ স্যোনা পৃথিবি ন ইতি ॥ ৩ ॥ ওঁ আপোহিষ্ঠেতি ॥ ৪ ॥ 
ওঁ যো বঃ শিবতম ॥ ৫ ॥ ইত্যন্তং পঠিত্বা ওঁ অন্নয়োন সহোবাচ বিজ্ঞায়তে হাস্তিহিরণ্যস্যাপাত্তং গোহশ্বানাং দাসীনাং প্রবরাণাং পরিবারাণাং মা নো ভবান্নহোরণং তস্যাপর্য্যন্তুস্য হবদান্যো অভূদিতি স বৈ গোতমতীর্থেনেক্ষাসা ইত্যুপৈষ্য হস্তবন্তমিতি বাচাহমস্যৈব পূর্ব্ব উপয়ন্তি সহোবাপায়ন কর্ত্তা উবাচ সহোবাচ দেবেষু বৈ গোতমতদ্ভুত্তরেষু মানুষাণাং ব্রূহি অপি হি নার্চ্চিষঃ দ্বেসৃতী অসৃণবং পিতৃণামহন্দেবানামুত মর্ত্যানাং তাভ্যামিদং বিশ্বমেতৎ সমেতি যদন্তরা পিতরং মাতরঞ্চ নাহমত একঞ্চ-রেতি করত ইতি প্রতিকাম্যুদাজহারেতে পুনর্গায়ত্রীঞ্চ পঠেৎ ইতি দ্বিতীয়া শান্তিঃ ॥ ২ ॥ ততো বামহস্তেন শর্করাং কুলত্থঞ্চ গৃহীত্বা নিষ্ঠীব্যাচামেৎ। পুনরপরস্মিন্ পাত্রে হস্তং দত্ত্বা গায়ত্রীং পঠিত্বা ওঁ শন্ন ইন্দ্রাগ্নী ভবতামবোভিঃ শন্ন ইন্দ্রাব-

রুণাঃ রাতহব্যা শন্ন ইন্দ্রাপূষাণা রাজসাতৌ সমিন্দ্রা সোমা সবিতায় শংযোঃ। ততঃ শন্নো দেবীরভিষ্টয় ইত্যাদি পূর্ব্বোক্তমন্ত্র
চতুষ্টয়ং পঠিত্বা ওঁ তস্মা অরঙ্গ মাম বো যস্য ক্ষয়ায় জিন্বথ আপো জনয়থা চ ন। ওঁ দ্যৌঃ শান্তিরন্তরীক্ষং শান্তিঃ পৃথিবী
শান্তিরাপঃ শান্তিরোষধয়ঃ শান্তির্ব্বনস্পতয়ঃ শান্তিঃ শান্তিরেব শান্তিঃ সমা শান্তিরেধি। ওঁ দৃতে দৃম্‌হ মা মিত্রস্য মা
মা চক্ষুসা সর্ব্বাণি ভূতানি সমীক্ষন্তাং মিত্রস্যাহং চক্ষুসা সর্ব্বাণি ভূতানি সমীক্ষে মিত্রস্য চক্ষুসা সমীক্ষামহে দৃতে দৃম্‌হ
মা জ্যোক্তে সংদৃষি জীব্যাসং জ্যোক্তে সংদৃষি জীব্যাসং ওঁ নমস্তে হরসে শোচিষে নমস্তে হস্ত্বর্চ্চিষে অন্যাস্তে অস্মত্তপন্তু-
হেতয়ঃ পাবকো হস্যং শিবো ভব নমস্তেঽস্তু বিদ্যুতে নমস্তে স্তনয়িত্নবে নমস্তে ভগবন্নস্তু যতস্বঃ সমীহসে যতো যতঃ সমী-
হসে ততো নোঽভয়ং কুরু শন্নঃ কুরু প্রজাভ্যো ঽভয়ন্নঃ পশুভ্যঃ সুমিত্রা ন আপঃ ওষধয়ঃ সন্তু দুর্মিত্রিয়াস্তস্মৈ সন্তু
যোঽস্মান্ দ্বেষ্টি যঞ্চ বয়ং দ্বিষ্মঃ। ওঁ তচ্চক্ষুর্দেবহিতং পুরস্তাচ্ছুক্রমুচ্চরৎ পশ্যেম শরদঃ শতং শৃণুয়াম শরদঃ শতম্। তদস্তু
মিত্রাবরুণয়োস্ত্বা মুঞ্চত্বস্য দেবোয়ানস্ত্বা গৃভ্নাতু বিশ্বে দেবাস্ত্বা গৃভ্নাতু বিশ্বেদেবাস্ত্বয়ি জগাম গৃহাণেবৈ প্রতিষ্ঠাচ্ছত্রং তৎ
প্রতিষ্ঠিতং ময়া বাচা সংস্তব্যং তস্মাদদ্যপশূন্ লভতে গৃহাণেবৈ নাজিগমিষতি পশূনাং প্রতিষ্ঠা পুনর্গায়ত্রীং পঠেৎ। ততশ্চ-
তুর্থ পাত্রে হস্তং দত্ত্বা গায়ত্রীং পঠিত্বা ওঁ শর্ম্মাবাতেন্দ্র জীব যস্মাৎ কোবাৎ পৃথিবী শান্তিরিতি স্বস্তি নো তত্ত্বাভিবিঞ্চামি
ভূর্ভুবঃ স্বস্তত্ত্বাভিবিঞ্চামি ব্রাহ্মণেভ্যো দেবেভ্যঃ সর্ব্বেভ্যো ভূতেভ্যস্তুয়ি জগাম। ওঁ ইন্দ্র জীবা সুমীতী সূষা পুনাতু সোমঃ স্বস্ত্যা-
বরুণঃ সুনীত্যা যমো রাজা প্রমৃণাভি পুনাতু মা জাতবেদাসূজ্জয়ন্ত্যা পুনাতু। ওঁ যস্মাৎ কোবান্মে শত পাপম্নগ্রং যজ্ঞায়-

মানস্য চ কিঞ্চিদন্যৎ। জ্ঞাতস্য যচ্চাপি চ বর্দ্ধিতো মে তৎ পাবমানীভিরহং পুনামি। ওঁ গোঘ্নাত্তস্করত্বাৎ স্ত্রীবধাৎ যচ্চ
কিল্বিষং পাবকঞ্চরণেভ্যস্তৎ পাবমানীভিরহং পুনামি। ওঁ দ্যৌঃ শান্তিরন্তরীক্ষং শান্তিঃ পৃথিবী শান্তিরাপঃ শান্তিরোষধয়ঃ
শান্তিঃ শান্তিরেব শান্তিঃ। পুনর্গায়ত্রীং পঠেৎ। ততস্তৈরুদকৈঃ সর্ব্বানশৌচিনঃ গৃহদ্রব্যাণি চ প্রোক্ষয়েদিতি। ততো ব্রাহ্ম-
ণান্ স্বস্তি বাচয়িত্বা বিপ্রো জলং শূদ্রশ্চ যষ্টিং স্পৃষ্ট্বা শুদ্ধঃ সন্ বৈধ স্নানাদি নিত্যক্রিয়াং কুর্য্যাৎ॥ * ॥ * ॥

অথ যজুর্ব্বেদিনাং পূরকপিণ্ডদানং॥ * ॥ তত্র প্রথমং দক্ষিণাভিমুখ আচম্য প্রাচীনাবীতী পাতিতবামজানুঃ ওঁ কুরু-
ক্ষেত্রং গয়াগঙ্গা প্রভাস পুষ্করাণি চ তীর্থান্যেতানি পুণ্যানি প্রথম পূরকপিণ্ডদানকালে ভবন্ত্বিহ ইতি পঠেৎ। দ্বিতীয়াদি
পিণ্ডেতু দ্বিতীয় পূরকপিণ্ডদানকালে ইতি বিশেষঃ। ততঃ ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বেঽসুরদানবা ময়া
রক্ষাংসি যক্ষাঃ সপিশাচ সংঘা হতা ময়া যাতু ধানাশ্চ সর্ব্বে ইতি মন্ত্রেণ নৈর্ঋত কোণাদারভ্য পূর্ব্বাদি ক্রমেণ উত্তরাগ্রং ৪২০
মণ্ডলং কৃত্বা ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ওঁ নিহন্মি সর্ব্বমিত্যাদিনা সমূলকুশদ্বয়েন দক্ষিণাগ্রং রেখাদ্বয়ং কৃত্বা তম-
ভ্যুক্ষ্যাত্মবামে নীবীং বিধৃত্য বামহস্তেন মণ্ডলং ধৃত্বা বিষ্ণুরোম্ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতদবনেনিক্ষ্ব তুভ্যমুপতিষ্ঠতাং
ইতি রেখামভ্যুক্ষ্য তুলসীং দূরীকৃত্য রেখোপরি সমূলান্ কুশানাস্তীর্য্য ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ইতি আস্তীর্ণ কুশো-
পরি তিলান্ বিকীর্য্য তিল মধু ঘৃত দুগ্ধযুক্তং পিণ্ডং গৃহীত্বা ওঁ মধুবাতেতি মন্ত্রং পঠিত্বা বিষ্ণুরোমদ্যেত্যাদি অমুক
গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ এতৎ প্রথমপিণ্ডং শিরঃ পূরকমুপতিষ্ঠতাং ইতি পিতৃতীর্থেনাস্তীর্ণ কুশোপরি দদ্যাৎ। দ্বিতী-

য়াদি পিণ্ডে বিশেষো যথা দ্বিতীয়ে এতদ্দ্বিতীয় পিণ্ডং কর্ণাক্ষিনাসাপূরকং। তৃতীয় পিণ্ডে এতত্তৃতীয়পিণ্ডং গলাংশভুজবক্ষঃ-
পূরকং। চতুর্থ পিণ্ডে এতচ্চতুর্থ পিণ্ডং নাভিলিঙ্গগুদপূরকং। পঞ্চম পিণ্ডে এতৎ পঞ্চম পিণ্ডং জানুজংঘাপাদপূরকং। ষষ্ঠ পিণ্ডে
এতৎ ষষ্ঠ পিণ্ডং সর্ব্ববর্ম্মপূরকং। সপ্তম পিণ্ডে নাড়ীপূরকং। অষ্টম পিণ্ডে এতদষ্টমপিণ্ডং দন্তরোমপূরকং। নবম পিণ্ডে এত-
ন্নবম পিণ্ডং বীর্য্যপূরকং। দশম পিণ্ডে এতদ্দশম পিণ্ডং পূর্ণতা তৃপ্ততা ক্ষুদ্বিপর্য্যয় পূরকমিতি বিশেষঃ। এতদেবশুদ্বিতত্ত্বে।
শিরস্ত্বাদ্যেন পিণ্ডেন প্রেতস্য ক্রিয়তে বিধঃ। দ্বিতীয়েন তু কর্ণাক্ষিনাসিকা চ তথাপরং। গলাংশ ভুজবক্ষাংসি তৃতীয়েন তু
পূরয়েৎ। চতুর্থেন তু পিণ্ডেন নাভিলিঙ্গগুদানি চ। জানুজংঘান্তথা পাদং পঞ্চমেন তু সর্ব্বদা। সর্ব্বমর্ম্মাণি ষষ্ঠেন সপ্তমেন
তু নাড়য়ঃ। দন্তরোমন্যেষ্টমেন বীর্য্যঞ্চ নবমে ন তু। পূর্ণতা তৃপ্ততাচৈব দশমেক্ষুদ্বিপর্য্যয়ঃ॥ ইতি। তত পিণ্ডান্তিকে পিণ্ড- ৪২১
শেষং বিকীরেৎ। ততঃ কৃতাঞ্জলিঃ ওঁ অত্র প্রেত মাদয়স্ব যথা ভাগমাবৃষায়থা। উত্তরা মুখো ভবন্ ওঁ বসন্তায় নমস্তুভ্যং
গ্রীষ্মায় চ নমো নমঃ বর্ষাভ্যশ্চ শরৎসঞ্জ ঋতবেচ নমঃ সদা হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ মাস সংবৎসরেভ্যশ্চ
দিবসেভ্যো নমো নমঃ। ওঁ ষড়েভ্যা ঋতুভ্যা ইতি শ্বাসং মুঞ্চেৎ। ততো দক্ষিণা মুখো ভবন্। ওঁ অমীমদৎ প্রেতো
যথা ভাগমাবৃষা ইষ্ট। ইতি পঠেৎ। ততঃ পিণ্ডোপাত্রপ্রক্ষালন জলেন বিষ্ণুরোম্ অমুক গোত্র প্রেতামুক দেববর্ম্মন্নেতৎ
প্রত্যবনেজনং তুভ্যমুপতিষ্ঠতাং এতত্তে প্রত্যবনেজনং ইতি পিণ্ডোপরি দদ্যাৎ। ততো নীবীং ত্যক্ত্বা পিণ্ডোপরি ষড়ঞ্জলিমন্ত্রং
পঠেৎ। ওঁ নমো বঃ প্রেতাঃ শুষায় নমো বঃ প্রেতাস্তপসে নমো বঃ প্রেতাজ্জীবং নমো বঃ প্রেতা রসায় নমো বঃ প্রেতা ঘোরায়

মন্যবে স্বধায়ৈ প্রেতা নমো বঃ তত এতত্তে প্রেতাবাসঃ ইতি পিণ্ডোপরি ঊর্ণাতন্তুং দদ্যাৎ। ততো বামহস্তেন ধৃত্বা
বিষ্ণুরোম্ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে ঊর্ণাতন্তুময়ং বাস উপতিষ্ঠতাং। ততঃ ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ
কীলালং পরিশ্রুতং স্বধাস্থ তর্পয়ত মে প্রেতমিতি পিণ্ডোপরি জলাঞ্জলিত্রয়ং দদ্যাৎ। ততস্তস্মৈ গন্ধাদিনা পিণ্ডং পূজয়েৎ।
ততঃ পিণ্ডসংখ্যায়া মৃণ্ময়াম পাত্রে জলং যেন পঞ্চপঞ্চাশত্তোয়াঞ্জলয়ো ভবন্তি একপাত্রে ক্ষীরং দদ্যাৎ। ততো বামহস্তেন ধৃত্বা
ওঁ নীরায় নমঃ ওঁ ক্ষীরায় নমঃ ইতি পূজয়িত্বা বিষ্ণুরোম্ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে স্নানার্থং নীরমুপতিষ্ঠতাং
ওঁ স্নাহি ইতি বদেৎ। বিষ্ণুরোম্ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে পানার্থং ক্ষীরমুপতিষ্ঠতাং। ওঁ পিব ইতি বদেৎ।
ততঃ কৃতাঞ্জলিঃ। ওঁ শ্মশানানলদগ্ধোঽসি পরিত্যক্তোঽসি বান্ধবৈঃ। ইদং নীরমিদং ক্ষীরমত্র স্নাহি ইদং পিব। ওঁ আকা- ৪২২
শস্থো নিরালম্বো বায়ুভূতো নিরাশ্রয়ঃ। অত্র স্নাত্বা ইদং পীত্বা স্নাত্বা পীত্বা সুখী ভব। ইতি মন্ত্রদ্বয়ং পঠেৎ। ততঃ কাক
বলিঃ। এতৎ পাদ্যং ওঁ যমদ্বারাবস্থিত নানা দিগ্‌দেশীয় বায়সেভ্যো নম ইত্যাদিনা পূজয়েৎ। ততো বাম হস্তেনান্নং ধৃত্বা
বিষ্ণুরোমদেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণস্তৃপ্ত্যর্থং যমদ্বারাবস্থিত নানা দিগ্‌দেশীয় বায়সেভ্য এষ বলির্নমঃ।
ইত্যুৎসৃজ্য কৃতাঞ্জলিঃ। ওঁ কাক ত্বং যমদূতোঽসি গৃহাণ বলিমুত্তমং যমলোকগতং প্রেতং ত্বমাপ্যায়িতু মর্হসি। ওঁ
কাকায় কাকপুরুষায় বায়সায় মহাত্মনে অত্র পিণ্ডং প্রযচ্ছামি কথ্যতাং ধর্ম্মরাজনি ইতি পঠেৎ॥ ততো ব্রাহ্মণায় দক্ষিণাং
দদ্যাৎ। যথা ওমদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ কৃতৈতৎ প্রথম পূরকপিণ্ডদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণা-

ত্যাদি। ততোঽচ্ছিদ্রং কুর্য্যাৎ। ততো দক্ষিণা মুখোভবন্ দক্ষিণস্কন্ধে উত্তরীয়ং দত্ত্বা পাতিতবামজানুঃ সর্ব্বং কুর্য্যাৎ। ততঃ
পুনঃ কুরুক্ষেত্রমিত্যাদি পঠিত্বা একস্যাং দ্রোণ্যাং দক্ষিণাগ্রং কুশব্রাহ্মণমেকং স্থাপয়িত্বা স্নাপয়েৎ। ওঁ সহস্রশীর্ষে-
ত্যাদিনা স্নাপয়িত্বা দক্ষিণাগ্রাসনে কুশোপরি দক্ষিণাগ্রং ব্রাহ্মণং দদ্যাৎ। তত এতৎ পাদ্যং ওঁ দর্ভময় ব্রাহ্মণায় নমঃ।
ইত্যাদিনা পূজয়েৎ। ততঃ পূর্ব্বাভিমুখো ভূত্বা যজ্ঞেশ্বরার্চ্চনং কুর্য্যাৎ। এতৎ পাদ্যং ওঁ যজ্ঞেশ্বরায় শ্রীবিষ্ণবে নমঃ।
ইত্যাদি। এতদ্বস্ত্রং। এতৎ শ্রাদ্ধীয়াগ্রভাগ সঘৃতোপকরণমামান্ন নৈবেদ্যং। পুনরাচমনীয়। তাম্বূলং। ততঃ কৃতাঞ্জলিঃ
ওঁ যজ্ঞেশ্বরো হব্য সমস্ত কব্য ভোক্তাব্যয়াত্মা হরিরীশ্বরোঽত্র। তৎ সন্নিধানাদপযান্তু সদ্যো রক্ষাংস্যশেষাণ্যসুরাশ্চ সর্ব্বে।
ওঁ জলৌঘমগ্নাসচরা চরা ধরা বিষাণকোট্যাখিল বিশ্বমূর্ত্তিনা। সমুদ্ধৃতা যেন বরাহরূপিণা স মে স্বয়ম্ভূর্ভগবান্ প্রসীদত। ওঁ নমো ৪২৭
ব্রহ্মণ্য ইত্যাদি প্রণমেৎ। ওঁ যজ্ঞেশ্বরো হরিঃ অত্রাধিষ্ঠানং কুরু যাবৎ শ্রাদ্ধং করোম্যহং। ততো বাস্তুপূজা। এতৎ পাদ্যং
ওঁ বাস্তু পুরুষায় নমঃ। ইত্যাদিনা পূজয়েৎ। পরকীয় ভূমৌচেৎ ওঁ এতৎ ভূস্বামি পিতৃভ্যঃ স্বধা। ইত্যাদিনা পূজয়েৎ।
ততো নিমন্ত্রণং। বিষ্ণুরোম্ তৎসদদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণ একোদ্দিষ্টবিধিক সাংবৎসরিকশ্রাদ্ধং কর্ত্তুং
কুশময় ব্রাহ্মণমহং নিমন্ত্রয়ে। ওঁ নিমন্ত্রণপ্রসন্নোস্মি ইতি ব্রাহ্মণে দদ্যাৎ। তত ওঁ অক্রোধনৈঃ শৌচপরৈঃ সততং ব্রহ্ম-
চারিভিঃ ভবিতব্যং ভবদ্ভিশ্চ ময়া চ শ্রাদ্ধকর্ম্মণি। ইতি কৃতাঞ্জলিঃ পঠেৎ। ততো দক্ষিণামুখঃ পাতিত বামজানুঃ দক্ষিণ-
স্কন্ধে উত্তরীয়ং দত্ত্বা ওঁ স্বাগতং ভবতা ইতি পৃচ্ছেৎ। ওঁ সুস্বাগতমিতি ব্রাহ্মণঃ। পুনঃ পাদ্যং। তত আসনং ধৃত্বা

মিদং রজতং তন্মূল্যং বা যথাসম্ভব গোত্রানাম্নে ব্রাহ্মণায়াহং দদানি॥ ইতি ব্রাহ্মণায় দদ্যাৎ ততো হচ্ছিদ্রাবধারণং বিষ্ণু স্মরণঞ্চ কুর্য্যাৎ। ততঃ স্বগৃহে পূর্ব্বোক্ত মন্ত্রেণ নীরক্ষীরং দদ্যাৎ॥ * ॥ * ॥ * ॥

॥ * ॥ * ॥ ইতি পূরকপিণ্ডদানং সমাপ্তং ॥ * ॥ * ॥

অথ হলায়ুধমতোক্ত। সাংবৎসরিকৈকোদ্দিষ্ট শ্রাদ্ধ প্রয়োগঃ॥ * ॥ অত্র পূর্ব্বদিনে কর্ত্তা ক্ষৌরাদিকং বিধায় হবিষ্যমেক বারং ভুক্ত্বা পরদিনে উষায় প্রাতঃনির্ব্বির্ত্তিত নিত্যক্রিয়ো মধ্যাহ্নে স্নানাদিকং কৃত্বা সন্ধ্যাং তর্পণং দেবার্চ্চনং তদভাবে সূর্য্যার্ঘ্যং দত্ত্বা যথাবিধি অন্নব্যঞ্জনাদিকং পরমান্নং বা পক্ত্বা যথাশক্তি দানান্যুৎসৃজেৎ। অশক্তৌ ভোজ্যোৎসর্গং কুর্য্যাৎ॥ তত এবান্নদানং॥ তদযথা পূর্ব্বাভিমুখো ভূত্বা বামস্কন্ধে উত্তরীয়ং দত্ত্বা কুশহস্ত আচম্য পাতিত দক্ষিণজানুর্বাক্যং কুর্য্যাৎ॥ ততঃ কৃতাঞ্জলি। ওঁ কুরুক্ষেত্রমিত্যাদি পঠিত্বা মণ্ডলং নির্ম্মায় এতে গন্ধপুষ্পে ওঁ সবস্ত্রোপকরণান্নায় নমঃ। ইতি ত্রিঃ। ওঁ এতৎ সম্প্রদান ব্রাহ্মণায় নমঃ। এতদধিপতয়ে ওঁ বিষ্ণবে নমঃ। ততঃ কুশবারিণা সংপ্রোক্ষ্য দক্ষিণহস্তেনালভ্য বামহস্তেন ধৃত্বা সজল ত্রিপত্রং গৃহীত্বা বিষ্ণুরোম্ তৎসদদ্য অমুকে মাসি অমুক পক্ষে অমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ একোদ্দিষ্ট-বিধিক সাংবৎসরিক শ্রাদ্ধবাসরে হমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সবস্ত্রোপকরণান্নং বিষ্ণুদৈবতং যথাসম্ভব গোত্রনাম্নে ব্রাহ্মণায়াহং দদানি। ইত্যন্নোপরি দত্ত্বা দক্ষিণাং কুর্য্যাৎ। বিষ্ণুরোম্ তৎসদদ্যেত্যাদি অমুক গোত্রস্য পিতুর-মুক দেবশর্ম্মণঃ স্বর্গকামনয়া কৃতৈতৎ সবস্ত্রোপকরণান্নদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণাং কাঞ্চনমূল্যং বিষ্ণুদৈবতং সম্ভবে

রক্ষাংসি ভূতান্যসুরাং স্তথোগ্রান্নির্ণাশয়ন্তুস্ত্বশিবং প্রজানাং। আদ্যাঃ সুরাণামমরেশপূজ্যা স্তৃপ্যন্তু তে হস্মিন্ প্রণতোহস্মি তেভ্যঃ। অগ্নিস্বাত্তাবর্হিষদ আজ্যপাঃ সোমপাস্তথা। ব্রজন্তু তৃপ্তিং শ্রাদ্ধেহস্মিন্ পিতরস্তর্পিতা ময়া। অগ্নিস্বাত্তাঃ পিতৃগণাঃ প্রাচীং রক্ষন্তু মে দিশং। তথা বর্হিষদঃ পান্তু যাম্যাং মে পিতরঃ স্মৃতাঃ। প্রতীচীমাজ্যপাস্তদ্বদুদীচীমপি সোমপাঃ। রক্ষোভূতপিশাচেভ্যস্তথৈবাসুরদোষতঃ। সর্ব্বতশ্চাধিপস্তেষাং যমো রক্ষাং করোতু মে। বিশ্বো বিশ্বভুগারাধ্যো ধর্ম্মো ধন্যশ্চ শাশ্বতঃ। ভূতিদো ভূতিকৃদ্ভূতিঃ পিতৄণাং যে গণানবঃ। কল্যাণং কলতা কর্ত্তা কল্যঃ কল্যতরাশ্রয়ঃ। কল্যতাহেতুরনঘঃ ষড়িমে তে গণাঃ স্মৃতাঃ বরো বরেণ্যো বরদঃ পুষ্টিদস্তুষ্টিদস্তথা। বিশ্বপাতা তথা ধাতা সপ্তৈবৈতে গণাঃ স্মৃতাঃ। মহান্মহাত্মা মহিতো মহিমাবান্মহাবলঃ গণাঃ পঞ্চ তথৈবৈতে পিতৄণাং পাপনাশনাঃ। সুখদো ধনদশ্চান্যো ধর্ম্মো ধন্যশ্চ ভূতিদঃ। পিতৄণাং কথ্যতে চৈতৎ তথা গণচতুষ্টয়ং একত্রিংশৎ পিতৃগণা যৈর্ব্যাপ্তমখিলং জগৎ। তে নোহত্র তৃপ্তাস্তুষ্যন্তু দিশন্তু চ সদা হিতং ॥ * ॥ * ॥

॥ * ॥ ইতি মার্কণ্ডেয় পুরাণেরৌচ্য মন্বন্তরে ॥ * ॥

রসাতলে। ভোগৈরশেষৈর্বিবিধৈর্বিনাগৈঃ কামানভীপ্সুভিঃ। নমস্যেহহং পিতৃন্ শ্রাদ্ধে সর্পৈঃ সন্তর্পিতান্ সদা। তত্রৈব বিধি-
বন্মন্ত্রৈর্ভোগসম্পৎসমন্বিতৈঃ। পিতৃন্নমস্যে নিবসন্তি সাক্ষাৎ যে দেবলোকে চ তথান্তরীক্ষে। মহীতলে যে চ সুরারি পূজ্যাস্তেমে
প্রতীচ্ছন্তু ময়োপনীতং। পিতৃন্নমস্যে পরমাণুভূতা যে বৈ বিমানে নিবসন্ত্যমর্ত্যাঃ। যজন্তি যানস্তমলা নমোভির্যোগীশ্বরাঃ ক্লেশবিমুক্তি-
হেতূন্। পিতৃন্নমস্যে দিবি যে চ মুক্তাঃ স্বধাভুজঃ কাম্যফলাভিসন্ধৌ। প্রদানশক্তাঃ সকলেপ্সিতানাং বিমুক্তিদা যেহনভিসংহি
তেষু। তৃপ্যন্তু তেহস্মিন্ পিতরঃ সমস্তা ইচ্ছাবতাং যে প্রদিশন্তি কামান্। ভূপত্বমিন্দ্রত্বমিতোধিকং বা সুতান্ পশূন্ স্বানি
বলং গৃহাণি। সোমস্য যে রশ্মিষু যে হর্কবিম্বে শুক্লে বিমানে চ সদা বসন্তি। তৃপ্যন্তু তেহস্মিন্ পিতরোহন্নতোয়ৈর্গন্ধাদিনা তুষ্টি-
মিতো ব্রজন্তু। যেষাং হুতে হগ্নৌ হবিষা চ তৃপ্তয়ে ভুঞ্জতে বিপ্রশরীরসংস্থাঃ। যে পিণ্ডদানেন মুদং প্রয়ান্তি তৃপ্যন্তু তেহস্মিন্ পিত-
রোহন্নতোয়ৈঃ। যে খড়্গমাংসেন সুরৈরভীষ্টৈঃ কৃষ্ণৈস্তিলৈর্দিব্যমনোহরৈশ্চ। কালেন শাকেন মহর্ষিবর্য্যৈঃ সংপ্রীণিতাস্তে মুদমত্র
যান্তু। কব্যান্যশেষাণি চ যান্যভীষ্টান্যতীব তেষামমরার্চ্চিতানাং। তেষান্তু সান্নিধ্যমিহাস্তু পুষ্পগন্ধাম্বুভোজ্যেষু ময়া হুতেষু।
দিনে দিনে যে প্রতিগৃহ্নতেহর্চ্চাং মাসান্তপূজ্যা ভুবি যে হষ্টকাসু। যে বৎসরান্তে হভ্যুদয়ে চ পূজ্যাঃ প্রয়ান্তু তে মে পিতরোহত্র তৃপ্তিং।
পূজ্যা দ্বিজানাং কুমুদেন্দুভাসো যে ক্ষত্রিয়াণাঞ্চ নবার্কবর্ণাঃ। তথা বিশাং যে নরকাবদাতা নীলীনিভাঃ শূদ্রজনস্য যে চ। তে হস্মিন্
সমস্তা মম গন্ধ পুষ্প দীপান্নতোয়াদি নিবেদনেন। তথাগ্নিহোমেন চ যান্তু তৃপ্তিং সদা পিতৃভ্যঃ প্রণতোহস্মি তেভ্যঃ। যে দেব-
পূর্ব্বাণ্যভিতৃপ্তিহেতোরশ্নন্তি কব্যানি শুভাহৃতানি। তৃপ্তাশ্চ যে ভূতিসৃজো ভবন্তি তৃপ্যন্তু তে হস্মিন্ প্রণতোহস্মি তেভ্যঃ।

প্রজাঃ সুতান্ বিপ্র সমুৎপাদ্য ক্রিয়াস্তথা। কৃত্বা হৃতাধিকারস্ত্বং ততঃ সিদ্ধিমবাপ্স্যসি। স ত্বং তথোক্তং পিতৃভিঃ কুরু দারপরি-
গ্রহং। কামঞ্চেমমভিধ্যায়ন্ ক্রিয়তাং পিতৃপূজনং। ত এব তুষ্টাঃ পিতরঃ প্রদাস্যন্তি তবেপ্সিতং। পত্নীং সুতাংশ্চ সন্তুষ্টাঃ
কিং ন দদ্যুঃ পিতামহাঃ। মার্কণ্ডেয় উবাচ। ইত্যর্ষিবচনং শ্রুত্বা ব্রহ্মণো ব্যক্তজন্মনঃ। নদ্যা বিবিক্তে পুলিনে চকার পিতৃ-
তর্পণং। তুষ্টাব চ পিতৃন্ বিপ্র স্তবৈরেভিরথাদৃতঃ। একাগ্র প্রয়তো ভূত্বা ভক্তিনম্রাত্মকন্ধরঃ। রুচিরুবাচ। নমস্যেহং পিতৃন্
ভক্ত্যা যে বসন্ত্যধিদেবতাঃ। দেবৈরপি হি তর্প্যন্তে যে শ্রাদ্ধেষু স্বধোত্তরৈঃ। নমস্যেহং পিতৃন্ স্বর্গে সংতর্প্যন্তে মহর্ষিভিঃ।
শ্রাদ্ধৈর্ম্মনোরমৈর্ভক্ত্যা ভক্তিমুক্তিমভীপ্সুভিঃ। নমস্যেহং পিতৃন্ স্বর্গে সিদ্ধাঃ সন্তর্পয়ন্তি যান্। শ্রাদ্ধেষু দিব্যৈঃ সকলৈরুপ-
হারৈরনুত্তমৈঃ। নমস্যেহং পিতৃন্ ভক্ত্যা যের্চ্চ্যন্তে গুহ্যকৈর্দিবি। তন্ময়ত্বেন বাঞ্ছদ্ভির্ঋদ্ধিমাত্যন্তিকীং পরাং। নমস্যেহং ৪৩৪
পিতৃন্ মর্ত্তৈরর্চ্চ্যন্তে ভুবি যে সদা। শ্রাদ্ধেষু শ্রদ্ধয়াভীষ্টলোকপুষ্টিপ্রদায়িনঃ। নমস্যেহং পিতৃন্ বিপ্রৈরর্চ্চ্যন্তে ভুবি যে সদা।
বাঞ্ছিতাভীষ্টলাভায় প্রাজাপত্য প্রদায়িনঃ। নমস্যেহং পিতৃন্ বিপ্রৈস্তর্প্যন্তেরন্যবাসিভিঃ। অন্যৈঃ শ্রাদ্ধৈর্যতাহারৈস্তপোনির্ধূত-
কল্মষৈঃ। নমস্যেহং পিতৃন্ বিপ্রৈর্নৈষ্ঠিকব্রহ্মচারিভিঃ। যে সংযতাত্মভির্নিত্যং সন্তর্প্যন্তে সমাধিভিঃ। নমস্যেহং পিতৃন্
শ্রাদ্ধে রাজন্যাস্তর্পয়ন্তি যান্। কব্যৈরশেষৈর্বিধিবৎ লোকত্রয়ফলপ্রদান্। নমস্যেহং পিতৃন্ বৈশ্যৈরর্চ্চ্যন্তে ভুবি যে সদা। স্বকর্ম্মা-
ভিরতৈর্নিত্যং পুষ্পধূপান্নবারিভিঃ। নমস্যেহং পিতৃন্ শ্রাদ্ধে শূদ্রৈরপি চ ভক্তিতঃ। সন্তর্প্যন্তে জগত্যত্র নাম্না খ্যাতাঃ সুকালিনঃ।
নমস্যেহং পিতৃন্ শ্রাদ্ধে পাতালে যে মহাসুরৈঃ। সন্তর্প্যন্তে স্বধাহারৈস্ত্যক্তদম্ভমদৈঃ সদা। নমস্যেহং পিতৃন্ শ্রাদ্ধৈরর্চ্চ্যন্তে যে

পঙ্কেন দিহ্যতে। রুচিরুবাচ। অবিদ্যা পঠ্যতে দেবৈঃ কর্ম্মমার্গে পিতামহাঃ। তৎ কথং কর্ম্মণো মার্গে ভবন্তো যোজয়ন্তি মাং।
পিতর উচুঃ। অবিদ্যা সত্যমেবৈতৎ কামং নৈতন্মৃষা বচঃ। কিন্তু বিদ্যা পরিপ্রাপ্তি হেতুঃ কর্ম্ম ন সংযমঃ। বিহিতঃ কর্ম্মণা
বন্ধো অসদ্ভিঃ ক্রিয়তে তু যৎ। সংযমো মুক্তয়ে নান্যঃ প্রত্যুতাধোগতিপ্রদঃ। প্রক্ষালয়ামীতি ভবান্ বৎসাত্মানন্তু মন্যতে। বিহিতা-
করণোদ্ভূতৈঃ পাপৈস্ত্বন্তু বিদিহ্যসে। অবিদ্যাপ্যুপকারায় বিষবজ্জায়তে নৃণাং। অনুষ্ঠিতাহ্যপায়েন বন্ধায়ান্যায়তো হি সা।
তস্মাদ্বৎস কুরুষ ত্বং বিধিবদ্দারসংগ্রহং। মা জন্ম বিফলং তেস্তু অসংপ্রাপ্যান্যলৌকিকং। রুচিরুবাচ। বৃদ্ধোহং সাম্প্রতং
কো মে পিতরঃ সংপ্রদাস্যতি। ভার্য্যাং তথা দরিদ্রস্য দুষ্করো দারসংগ্রহঃ। পিতর উচুঃ। অস্মাকং পতনং বৎস ভবতশ্চাপ্যধোগতিঃ।
নূনং ভাবী ভবিত্রী চ নাভিনন্দসি নো বচঃ। মার্কণ্ডেয় উবাচ। ইত্যুক্ত্বা পিতরস্তস্য পশ্যতো মুনিসত্তম। বভূবুঃ সহসাদৃশ্যা দীপা বাত-
হতা ইব। স তেন পিতৃবাক্যেন ভৃশমুদ্বিগ্নমানসঃ। কন্যাভিলাষী বিপ্রর্ষিঃ পরিবভ্রাম মেদিনীং। কন্যামলভমানোসৌ
পিতৃবাক্যাগ্নিদীপিতঃ। চিন্তামবাপ মহতী মতীবোদ্বিগ্নমানসঃ। কিং করোমি ক্ব গচ্ছামি কথং মে দারসংগ্রহঃ। ক্ষিপ্রং ভবেন্মৎ
পিতৃণাং মমাভ্যুদয়কারকঃ। ইতি চিন্তয়তস্তস্য মতির্জ্জাতা মহাত্মনঃ। তপসারাধয়াম্যেনং ব্রহ্মাণং কমলোদ্ভবং। ততো বর্ষশতং
দিব্যং তপস্তেপেস বেধসঃ। তত্র স্থিতং চিরং কালং বনেষু নিয়মাস্থিতঃ। আরাধয়ামাস তদা পরং নিয়ম মাস্থিতঃ। ততঃ সন্দর্শয়ামাস ব্রহ্মা
লোকপিতামহঃ। উবাচ চ প্রসন্নোস্মীত্যুচ্যতামভিবাঞ্ছিতং। ততো হসৌ প্রণিপত্যাহ ব্রহ্মাণং জগতো গতিং। পিতৃণাং বচনাত্তেন যৎ
কর্ত্তুমভি বাঞ্ছিতং। ব্রহ্মা প্রাহ রুচিং বিপ্র শ্রুত্বা তস্যাভিবাঞ্ছিতং। ব্রহ্মোবাচ। প্রজাপতিস্ত্বং ভবিতা স্রষ্টব্যা ভবতা প্রজাঃ। সৃষ্ট্বা

অথ রুচিস্তোত্রং ॥ * ॥ নারায়ণং নমস্কৃত্য নরঞ্চৈব নরোত্তমং। দেবীং সরস্বতীঞ্চৈব ততো জয়মুদীরয়েৎ। মার্কণ্ডেয় উবাচ। রুচিঃ প্রজাপতিঃ পূর্ব্বং নির্ম্মমো নিরহঙ্কৃতঃ। যতঃ স্বমিতশায়ী চ চচার পৃথিবীমিমাং। অনগ্নিমণিকেতঞ্চৈবৈকাহারমনাশ্রমং। বিমুক্ত সঙ্গমং দৃষ্ট্বা প্রোচুঃ স্বপিতরো মুনিং। পিতর উবাচ। বৎস কস্মাৎ ত্বয়া পুণ্যো ন কৃতোদারসংগ্রহঃ। স্বর্গাপবর্গহেতুত্বাৎ বন্ধস্তেনানিশং বিনা। গৃহী সমস্ত দেবানাং পিতৃণাঞ্চ তথার্চ্চনং। ঋষীণামতিথীনাঞ্চ কুর্ব্বন্ লোকানুপশ্নুতে। স্বাহোচ্চারণতো দেবান্ স্বধোচ্চারণতঃ পিতৃন্। বিভজত্যন্নদানেন ভূতাদীনতিথীনপি। স ত্বং দৈবাদৃণাদ্বৎস বন্ধমস্মদৃণাদপি। অবাপ্নোষি মনুষ্যর্ষি ভূতেভ্যশ্চ দিনে দিনে। অনুৎপাদ্য সুতান্ দেবান্ সন্তর্প্য চ স্বকান্ পিতৃন্। ভূতাদীংশ্চ স্বকান্ মৌঢ্যাৎ স্বর্গতিং গন্তুমিচ্ছসি। ক্লেশমেবৈককং পুত্র মন্যামোত্র ভবেত্তব। মৃতস্য নরকং তদ্বৎ ক্লেশমেবান্যজন্মনি। রুচিরুবাচ। পরিগ্রহোতি দুঃখায় পাপায়াধোগতেস্তথা। ভবত্যতো ময়া পূর্ব্বং ন কৃতো দারসংগ্রহঃ। আত্মনঃ সংযমোপায়ঃ ক্রিয়তে ক্ষনিযন্ত্রদা। স মুক্তিহেতুর্ন ভবত্যপিদারপরিগ্রহাৎ। প্রক্ষাল্যতে হ্যনুদিবসং যদাত্মা নিষ্পরিগ্রহৈঃ। মমত্বপঙ্কদিগ্ধোপি চিতাম্ভোভির্ব্বরং হি তৎ। অনেক ভবসংভুত কর্ম্ম পঙ্কাঙ্কি তা বুধৈঃ। আত্মা সদ্বাসনাতোয়ৈঃ প্রক্ষাল্যানিয়তেন্দ্রিয়ৈঃ। পিতর উচুঃ। যুক্তং প্রক্ষালনং কর্ত্তুমাত্মনোনিয়তেন্দ্রিয়ৈঃ। কিন্তু নোপায়মার্গোয়ং যত্র ত্বং পুত্র বর্ত্তসে। পুত্রান্নদানৈ রদুতং লভ্যতে নাভিসন্ধিতৈঃ। ফলৈস্তথোভোগৈশ্চ পূর্ব্বকর্ম্ম শুভাশুভৈঃ এবং ন বদ্ধো ভবতি কুর্ব্বতঃ কারণাত্মকং। ন চ বন্ধায় তৎ কর্ম্ম ভবত্যনভিসন্ধিতং। পূর্ব্বং কর্ম্মং কৃতং ভোগৈঃ ক্ষীয়তে হ্যহর্নিশং তদা। সুখদুঃখাত্মকৈ র্বৎস পুণ্যাপুণ্যাত্মকং নৃণাং। এবং প্রক্ষাল্যতে প্রাজ্ঞৈরাত্মাবন্ধাচ্চ মোক্ষতে। ন ত্বেবমবিবেকেন পাপ-

কৃতং তস্যাক্ষয়ায়ৈ তৃপ্তয়ে হরি ব্রাহ্মণে সোপকরণমন্নাদি পাত্রং সমর্পিতং। ইতি দ্বিজহস্তে দদ্যাৎ। ওঁ স্বস্তীতি সংগৃহ্য
গায়ত্রীং জপেৎ কামস্তুতিঞ্চ পঠেৎ ততো হচ্ছিদ্রাবধারণং কুর্য্যাৎ। বিষ্ণুরোম্ তৎসদদ্যেত্যাদি কৃতৈতৎ একোদ্দিষ্ট বিধিক
সাংবৎসরিকশ্রাদ্ধ কর্ম্মাচ্ছিদ্রমস্তু। ততো বিষ্ণুস্মরণং। বিষ্ণুরোম্ তৎসদদ্যেত্যাদি অমুক গোত্রঃ শ্রী অমুক দেবশর্ম্মা কৃতৈ-
তৎ একোদ্দিষ্ট বিধিক সাংবৎসরিক শ্রাদ্ধকর্ম্মণি যদ্বৈগুণ্যং জাতং তদ্দোষোপশমনায় দশধা শ্রী বিষ্ণুস্মরণমহং করিষ্যে।
ইতি দশধা বিষ্ণুস্মরণং কুর্য্যাৎ। ওঁ অজ্ঞানাদ্যদি বা মোহাদিত্যাদি। অদ্যেত্যাদি ময়া এতৎ কৃতং কর্ম্ম শ্রী বিষ্ণুচরণে
সমর্পিতং। ওঁ ন্যূনাতিরিক্ততা ইত্যাদি। ওঁ প্রীয়তাং পুণ্ডরীকাক্ষ ইত্যাদি। ততঃ পিণ্ডাংস্তু গো হজ বিপ্রেভ্যো অগ্নৌ
জলে বা দদ্যাৎ। ইতি দত্ত্বা কুশান্ ত্যক্ত্বা হস্তপাদৌ প্রক্ষাল্যাচম্য সূর্য্যনমস্কারং কৃত্বা দীপাচ্ছাদনং কুর্য্যাৎ ততঃ শান্ত্যা-
শীর্ব্বাদং কুর্য্যাৎ ॥ * ॥ * ॥ * ॥ * ॥ * ॥ 

॥ * ॥ * ॥ ইত্যেকোদ্দিষ্ট বিধিক সাংবৎসরিকশ্রাদ্ধ প্রয়োগঃ সমাপ্তঃ ॥ * ॥ * ॥

দদ্যাৎ। ওঁ অঘোরঃ পিতাস্তু ইতি বদেৎ। ওঁ অস্তু ব্রাহ্মণঃ। ওঁ গোত্রন্নো বর্দ্ধতামিতি বদেৎ। ওঁ বর্দ্ধতামিতি ব্রাহ্মণঃ। ওঁ আশিষো মে প্রদীয়ন্তাং ইতি বদেৎ। ওঁ আশিষঃ প্রতিগৃহ্যন্তামিতি ব্রাহ্মণঃ। ওঁ দাতারো নোঽভিবর্দ্ধন্তাং বেদাঃ সন্ততিরেব চ। শ্রদ্ধা চ নো মা ব্যগমদ্বহুদেয়ঞ্চ নো ঽস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি। যাচিতারশ্চ নঃ সন্তু মা চ যাচি স্মকঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং দাতা শতং জীবতু। যেভ্যঃ সঙ্কল্পিতা দ্বিজাস্তেষামক্ষয়া তৃপ্তিরস্তু। এতাঃ সত্যা আশিষঃ সন্তু পিতৃবর প্রসাদোঽস্তু। ইতি পঠিত্বা আসনে পুষ্পং দত্ত্বা আসনাৎ পুষ্পান্তর মানীয় ভূমিং স্পর্শয়িত্বা শিরসি দদ্যাৎ। ততো দক্ষিণান্দদ্যাৎ। সতিল-মোটকং গৃহীত্বা বিষ্ণুরোম্ তৎসদদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ কৃতৈতৎ একোদ্দিষ্ট বিধিক সাংবৎসরিক শ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণু দৈবতং যথাসম্ভব গোত্রনাম্নে ব্রাহ্মণায়াহং দদানি। ইত্যাসনে দদ্যাৎ। ওঁ ত্বয়া দক্ষিণয়া সদক্ষিণমস্তু ওঁ রজতং রজতং রজতমিতি তর্জ্জনীং দর্শয়েৎ। পুনর্জ্জলগণ্ডূষং দদ্যাৎ। ওঁ অস্তু ব্রাহ্মণঃ ওঁ দেবতাভ্য ইতি ত্রিঃ পঠিত্বা জলেন বেষ্টয়েৎ। ওঁ অভিরম্যতাং ক্ষমস্ব ইত্যাসনং চালয়েৎ। ওঁ অভিরতো স্ব ইতি ব্রাহ্মণঃ। ততো জলপুষ্পং দত্ত্বা ওঁ আ মা বাজস্য প্রসবো জগম্যা দেমে দ্যাবা পৃথিবী বিশ্বরূপে আমাগন্তুং পিতরা মাতরা যুব মা মা সোমো ঽমৃতত্ত্বায় গম্যাৎ। ওঁ পিতা স্বর্গঃ পিতা ধর্ম্মঃ পিতা হি পরমন্তপঃ। পিতরি প্রীতিমাপন্নে প্রীয়ন্তে সর্ব্বদেবতাঃ। পিতৃচরণেভ্যো নমঃ। ইতি পঠিত্বা প্রণমেৎ। ততঃ গাত্রসমর্পণং। ওঁ ভবতাঽহং কৃতার্থীকৃত ইতি বদেৎ। ওঁ কৃতার্থো ভব ইতি ব্রাহ্মণঃ। তত উদঙ্মুখায় ব্রাহ্মণায় পাদ্যাদীনি দত্ত্বা স্বয়ং প্রাঙ্মুখো ভূত্বা দ্বিজস্য দক্ষিণাঙ্গুষ্ঠং গৃহীত্বা ওঁ যস্য শ্রাদ্ধং

মোটকেন গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র পিতুরমুক দেবশর্ম্মন্নেতৎ প্রত্যবনেজনং তুভ্যং স্বধা। ইতি পিণ্ডোপরি দদ্যাৎ।
ততো নীবী মোটকং ত্যজেৎ। ততো হস্তদ্বয়েন পিণ্ডোপরি ষড়ঞ্জলিমন্ত্রং পঠেৎ। ওঁ নমস্তে পিতঃ শুষ্মায়। ওঁ নমস্তে
পিতস্তপসে। ওঁ নমস্তে পিতারসায়। ওঁ নমস্তে পিতর্যজ্জীবং তস্মৈ। ওঁ নমস্তে পিতর্ঘোরায় মন্যবে ওঁ স্বধায়ৈ পিতর্নমঃ। ততো
নবমনবম্বা বাসঃ সূত্রং মোটকেন সহ ওঁ এতদ্বঃ পিতরো বাসঃ। ইতি পিণ্ডোপরি দদ্যাৎ। ততঃ সতিলমোটকং গৃহীত্বা
বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতদ্বাসস্তুভ্যং স্বধা। ইত্যুৎসৃজ্য দদ্যাৎ। ততঃ পিণ্ডোপরি উর্জ্জধারাং দদ্যাৎ।
ওঁ উর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধাস্থ তর্পয়ত মে পিতরং। ইতি দদ্যাৎ। ততো গন্ধাদিনা তুষ্ণীং
পিণ্ডং ভাস্কর মূর্ত্তিং ধ্যায়ন্ পূজয়েৎ। যাবৎ প্রদীপস্তিষ্ঠতি তাবন্নারায়ণনামানুকীর্ত্তনং কুর্য্যাৎ। ততো দীপে নির্ব্বাপিতে ৪২৯
আসনে ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা ওঁ পিণ্ডং সম্পন্নমিতি পৃচ্ছেৎ। ওঁ সুসম্পন্নমস্তু ব্রাহ্মণঃ। ওঁ পিণ্ড গয়াং যচ্ছ ইতি
সঞ্চাল্য ঘ্রাত্বা পাত্রান্তরে স্থাপয়েৎ। ততস্তরণ কুশান্ ভাগদ্বয়ং কৃত্বা ওঁ সুস্থপ্রোক্ষিতমস্তু। ইতি স্তরণ কুশোপরি জলগণ্ডূষং
দদ্যাৎ। ওঁ অস্তু ব্রাহ্মণঃ। ওঁ শিবা আপঃ সন্তু। ইত্যাসনে জলং দদ্যাৎ। ওঁ সন্তু ব্রাহ্মণঃ। ওঁ সৌমনস্যমস্তু পুষ্পং
দদ্যাৎ। ওঁ অস্তু ব্রাহ্মণঃ। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্তু ইত্যক্ষতান্দদ্যাৎ ওঁ অস্তু ব্রাহ্মণঃ। ততো হক্ষয্যং কুর্য্যাৎ। সতিলমোটকং
গৃহীত্বা বিষ্ণুরোম্ তৎসদদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণ একোদ্দিষ্টবিধিক সাংবৎসরিক শ্রাদ্ধে হস্মিন্দত্তমিদ-
মন্নপানাদিকমক্ষয্য মুপতিষ্ঠতাং। ইত্যাসনে দদ্যাৎ। ওঁ অস্তু ব্রাহ্মণঃ। ওঁ সর্ব্বং তস্মৈ উপতিষ্ঠতাং ইতি। পুনর্জলগণ্ডূষং

মিতি বদেৎ। ওঁ সুস্বদিতমিতি ব্রাহ্মণঃ। ওঁ শেষমন্নমপ্যস্তীতি বদেৎ। ওঁ ইষ্টেভ্যো যথা সুখং বিনিযুজ্যতামিতি ব্রাহ্মণঃ। ততো ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা ওঁ পিণ্ডদানমহং করোমি ইতি কৃতাঞ্জলিঃ। ওঁ কুরুষ ইতি ব্রাহ্মণঃ। ততো আত্মসংমুখে ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বেঽসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচ সংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। ইতি মন্ত্রেণ নৈর্ঋতাদি ক্রমেণ দক্ষিণাগ্রং চতুষ্কোণ মণ্ডলং কৃত্বা ওঁ অপহতানিহন্মিভ্যাং কুশমূলেন দক্ষিণাগ্রাং রেখাং কৃত্বা রেখামভ্যুক্ষ্য বামে মোটকেন নীবীবন্ধনং কৃত্বা বামহস্তেন পিণ্ডস্থানং ধৃত্বা দক্ষিণ হস্তেন সতিলমোটকং গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতদবনেনিক্ষ্ব ত্বভ্যং স্বধা। ইতি পিণ্ডস্থানে দদ্যাৎ। ততস্তুলসীং দূরীকৃত্য কুশাস্তরণং কৃত্বা ওঁ অপহতা সুরারক্ষাংসি বেদিষদ। ইতি তিলান্ বিকীর্য্য ওঁ মধুবাতেতি পঠিত্বা পিণ্ডে ঘৃত মধু তিলান্দত্ত্বা সতিল মোটকেন সহ পিণ্ডং গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতৎ পিণ্ডং সতিলোদকং ত্বভ্যং স্বধা। ইত্যঙ্গুষ্ঠ সংলগ্নং কুশোপরি পিতৃতীর্থেন দদ্যাৎ। যদি গঙ্গোদকং সম্ভবতি তদা সতিলগঙ্গোদকমিতি বিশেষঃ। ততঃ পিণ্ডান্তিকে পিণ্ড শেষং বিকীরেৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ অত্র পিতর্মাদয়স্ব যথা ভাগমাবৃষায়স্ব। ততো বামাবর্ত্তেনোদঙ্মুখঃ। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবেচ নমঃ সদা। হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ। মাসসংবৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ। ইতি ত্রিঃ পঠেৎ। ওঁ ষড়্ভ্যঃ ঋতুভ্যো নমঃ। ইতি শ্বাসং মুঞ্চেৎ। ততো দক্ষিণা মুখঃ কৃতাঞ্জলিঃ। ওঁ অমীমদৎ পিতা যথাভাগমাবৃষা ইষ্ট। ইতি পঠেৎ ততঃ পিণ্ডপাত্রে হস্তং প্রক্ষাল্য তজ্জলং সতিলং

আপঃ ইদং হবিঃ এতান্যুপকরণানি। ওঁ যথা সুখং বাগ্‌যতঃ স্বদ। ইতি ব্রাহ্মণায় পুনর্জলগণ্ডূষং দত্ত্বা মধুদানং কুর্য্যাৎ।
ওঁ মধুবাতা ঋতায়তে মধুক্ষরন্তি সিন্ধবঃ মাধ্বীর্নঃ সন্ত্বোষধীঃ। মধুনক্তমুতোষসো মধুমৎ পার্থিবং রজঃ মধুদ্যৌরস্তু নঃ পিতা
মধুমান্নো বনস্পতির্মধুমাংঅস্তু সূর্য্যোঃ মাধ্বীর্গাবো ভবন্তু নঃ। ইতি পঠিত্বা মধুমধ্বিতি জপেৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ সিদ্ধান্ন
দান মধুদান কর্ম্মাচ্ছিদ্রমস্তু। ওঁ অস্তু ইতি ব্রাহ্মণঃ। ততো রুচিস্তবাদিকং পঠেৎ। ততঃ ওঁ অন্নহীনং ক্রিয়াহীনং বিধি-
হীনঞ্চ যদ্ভবেৎ তৎসর্ব্বমচ্ছিদ্রমস্তু। ওঁ যোগীশ্বরং যাজ্ঞবল্ক্যং সংপূজ্য মুনয়োব্রুবন্। বর্ণাশ্রমেতরাণান্নো ব্রূহি ধর্ম্মানশেষতঃ।
মন্বত্রি বিষ্ণু হারীত যাজ্ঞবল্ক্যোশনোঙ্গিরাঃ। যমাপস্তম্ব সম্বর্ত্তাঃ কাত্যায়ন বৃহস্পতী। পরাশর ব্যাস শঙ্খ লিখিতা দক্ষ
গৌতমৌ। শাতাতপো বশিষ্ঠশ্চ ধর্ম্মশাস্ত্র প্রযোজকাঃ। ওঁ তদ্বিষ্ণোরিত্যাদি। ওঁ দুর্য্যোধনো মন্যুময়ো মহাদ্রুমঃ স্কন্ধঃ কর্ণঃ ৪২৭
শকুনিস্তস্য শাখা। দুঃশাসনঃ পুষ্পফলে সমৃদ্ধে মূলং রাজা ধৃতরাষ্ট্রো২মনীষী। ওঁ যুধিষ্ঠিরো ধর্ম্মময়ো মহাদ্রুমঃ স্কন্ধো২র্জ্জুনো ভীম-
সেনো২স্য শাখা। মাদ্রীসুতৌ পুষ্পফলে সমৃদ্ধে মূলং কৃষ্ণো ব্রহ্মচ ব্রাহ্মণাশ্চ। ওঁ শপ্ত ব্যাধা দশার্ণেষু মৃগাঃ কালাঞ্জরে গিরৌ
চক্রবাকাঃ সরদ্বীপে হংসাঃ সরসি মানসে। তেপি জাতাঃ কুরুক্ষেত্রে ব্রাহ্মণা বেদপারগাঃ। প্রস্থিতা দূরমধ্বানং যূয়ং তেভ্যোবসীদতঃ।
ততঃ স্বদক্ষিণেভূমৌ কুশানাস্তীর্য্য মোটকেন সহ জলমন্নং গৃহীত্বা ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যেপ্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন
তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিং। ইত্যনেন কুশোপরি দদ্যাৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্ন-
সিদ্ধির্নতথান্নমস্তি। তত্তৃপ্তয়ে২ন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। ততো ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা ওঁ স্বদিত-

সিদ্ধমিদমাসনমত্রাস্ব। ইতি পঠেৎ। ওঁ আস্যতামিতি ব্রাহ্মণঃ। ততো ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা কৃতাঞ্জলিঃ। ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এবচ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি। ইতি ত্রিঃ পঠেৎ। তত আসনং ধৃত্বা গায়ত্রীং জপেৎ। ততো ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা তুলসীপত্রমাদায় মোটকং গৃহীত্বা অনুজ্ঞাং কুর্য্যাৎ। বিষ্ণুরোম্ তৎসদদ্য অমুকে মাসি অমুকে পক্ষে অমুক তিথৌ অমুক গোত্রস্য পিতুরমুক দেবশর্ম্মণঃ একোদ্দিষ্টবিধিক সাংবৎসরিক শ্রাদ্ধং সিদ্ধান্নেন ঘৃতাদ্যুপকরণ সহিতেন সবস্ত্র তিলোদকেন দর্ভময় ব্রাহ্মণেঽহং করিষ্যে। ইত্যাসনে দদ্যাৎ। ওঁ কুরুষ্ব ইতি ব্রাহ্মণঃ। ততো মোটকং গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতদ্দর্ভাসন তুভ্যং স্বধা। ইত্যাসনে দত্ত্বা কুশব্রাহ্মণস্য পাদয়োরধঃ কুশান্দত্ত্বা যজ্জলেন শ্রাদ্ধীয় দ্রব্যং ভূমিঞ্চ প্রোক্ষয়েৎ। রক্ষার্থমুদকপাত্রমেকদেশে স্থাপয়েৎ। তত আবাহনং। ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ইতি পিতৃতীর্থেন তিলান্ বিকীরেৎ। ততোঽর্ঘ্যদানং। ব্রাহ্মণাগ্র ভূমৌ দক্ষিণাগ্রং কুশপত্রমেকং পাতয়িত্বা তদুপরি দক্ষিণাগ্রাসনে একাং দ্রোণীং স্থাপয়েৎ। ততঃ সাগ্রং কুশপত্রমেকং পবিত্রার্থং গৃহীত্বা ওঁ পবিত্রমসি বৈষ্ণবীতি মন্ত্রেণ প্রাদেশ প্রমাণং নখব্যতিরেকেন ছিত্ত্বা বামহস্তেন গৃহীত্বা দক্ষিণহস্তেন ওঁ বিষ্ণুর্মনসা পূতমসীতিস্নাপয়িত্বা তস্যাং দ্রোণ্যাং দক্ষিণাগ্রং স্থাপয়েৎ। ততঃ ওঁ শন্নদেবীরিতিবারত্রয়ং পঠিত্বা জলগণ্ডূষত্রয়ং দত্ত্বা ওঁ তিলোসি সোমদৈবত্যো গোসবো দেবনির্ম্মিতঃ। প্রত্নমদ্ভিঃ প্রক্তঃ স্বধয়া পিতৃন্ লোকান্ প্রীণাহি নঃ স্বাহা। ইতি মন্ত্রেণ তিলান্ বিকীর্য্য তুষ্ণীং গন্ধপুষ্পে দত্ত্বা কুশান্তরেণাচ্ছাদনং কুর্য্যাৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ অচ্ছিদ্রমিদমর্ঘ্যপাত্রমস্তু। ইতি পঠেৎ।

ওঁ অস্তু ইতি ব্রাহ্মণা ততঃ উদ্ঘাটনং ব্রাহ্মণহস্তে পবিত্রদানং। জলান্তরং পুষ্পান্তরঞ্চ দদ্যাৎ। ওঁ শিরঃ পাণ্যাদি সর্ব্ব
গাত্রেভ্যো নমঃ। ইত্যর্ঘ্যপাত্রস্থ পুষ্পং দদ্যাৎ। ততোঽর্ঘ্যপাত্রস্থ জলং বামহস্তে ধৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ
পয়সেত্যাদি মন্ত্রং পঠিত্বা সতিলমোটকং গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেষো ঽর্ঘ্যস্তুভ্যং স্বধা। ততো
গন্ধাদিদানং। গন্ধ পুষ্প ধূপ দীপ বাসাংসি দত্ত্বা মোটকং গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নেতানি
গন্ধ পুষ্প ধূপ দীপ যজ্ঞোপবীতবাসাংসি তুভ্যং স্বধা ইত্যাসনে দদ্যাৎ। ততঃ প্রত্যেকং দ্রব্যং দর্শয়েৎ। এষ তে গন্ধঃ
এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ। এতত্তে যজ্ঞোপবীতং এতত্তে বস্ত্রং এতত্তে সোপকরণং এতত্তে তাম্বূলং। ততঃ
কৃতাঞ্জলিঃ। ওঁ গন্ধাদিদানমিদমচ্ছিদ্রমস্তু। ওঁ অস্তু ইতি ব্রাহ্মণঃ। ওঁ ভোজনপাত্রমহং পাতয়িষ্যে ওঁ পাতয় ইতি ৪২৬
ব্রাহ্মণঃ। ততো ব্রাহ্মণাগ্রতো নৈর্ঋতাদি ক্রমেণ দক্ষিণাগ্রং চতুষ্কোণ মণ্ডলং কৃত্বা তদুপরি ভোজনপাত্রং পাতয়িত্বা সর্ব্বমন্ন
ব্যঞ্জনাদিকং পরিবেশয়েৎ কিন্তু কুষ্মাণ্ডালাবু বার্ত্তাকী নিষেধঃ। ব্রাহ্মণদক্ষিণে সামিষ সিদ্ধান্নব্যঞ্জনং জলঞ্চ দদ্যাৎ। ততঃ
পাত্রং বামহস্তেন ধৃত্বা দক্ষিণ হস্তেন ওঁ এতৎসর্ব্বং হবিঃ। শ্রী বিষ্ণো কব্যমিদং রক্ষস্ব ইতি জলাভ্যুক্ষণং। ওঁ ইদং বিষ্ণু-
র্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ় মস্য পাংশুলে। ইত্যঙ্গুষ্ঠনিবেশনং। ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ইতি তিলান্ বিকীর্য্য
ওঁ আপোশানমিতি জলগণ্ডূষং দত্ত্বা অন্নোপরি গায়ত্রীঞ্চ জপেৎ। ততঃ সতিলমোটকং গৃহীত্বা বিষ্ণুরোম্ অমুক গোত্র
পিতরমুক দেবশর্ম্মন্নেতৎ সঘৃতোপকরণ সিদ্ধান্নব্যঞ্জনং তুভ্যং স্বধা ইত্যুৎসৃজ্য প্রত্যেকং দ্রব্যং দর্শয়েৎ। ইদমন্নং ইমা

মার্কণ্ডেয় উবাচ ॥ * ॥ এবন্তু স্তুবতস্তস্য তেজসো রাশিরুচ্ছিখঃ। প্রাদুর্ব্বভূব সহসা গগণব্যাপ্তিকারঃ। তদ্দৃষ্টা সুমহত্তেজঃ সমাসাদ্য স্থিতং জগৎ। জানুভ্যামবনিং গত্বা রুচিঃ স্তোত্রমিদং জগৌ। রুচিরুবাচ। অর্চ্চিতানামমূর্ত্তানাং পিতৃণাং দীপ্ততেজসাং। নমস্যামি সদা তেষাং ধ্যানিনাং দিব্যচক্ষুষাং। ইন্দ্রাদীনাঞ্চ নেতারো দক্ষমারীচয়ো স্তথা। সপ্তর্ষীণাং তথান্যেষাং তান্নমস্যামি কামদান্। মন্বাদীনাং মুনীন্দ্রাণাং সূর্য্যাচন্দ্রমসোস্তথা। তান্নমস্যামহং সর্ব্বান্ পিতৄনপ্সু র্যাবপি। নক্ষত্রাণাং গ্রহাণাঞ্চ বায়্বগ্ন্যোর্নভস স্তথা। দ্যাবাপৃথিব্যোশ্চ সদা নমস্যামি কৃতাঞ্জলিঃ। দেবর্ষীণাং জনিতৄংশ্চ সর্ব্বলোক নমস্কৃতান্। অক্ষয্যস্য সদা দাতৄন্নমস্যামি কৃতাঞ্জলিঃ। প্রজাপতেঃ কশ্যপায় বরুণায় চ। যোগেশ্বরেভ্যঃ সদা নমস্যামি কৃতাঞ্জলিঃ। নমো গণেভ্যঃ সপ্তভ্য স্তথা লোকেষু সপ্তসু। স্বয়ম্ভুবে নমস্যামি ব্রহ্মণে যোগচক্ষুষে। সোমাধারান্ পিতৃগণান্ যোগমূর্ত্তিধরাং স্তথা। নমস্যামি সদা সোমং পিতরং জগতামহং। অগ্নিরূপাং স্তথৈবান্যান্নমস্যামি পিতৄনহং। অগ্নীসোমময়ং বিশ্বং যত এতদশেষতঃ। যে চ তেজসি যে চৈতে সোমসূর্য্যাগ্নিমূর্ত্তয়ঃ। জগৎ স্বরূপিণশ্চৈব তা ব্রহ্মস্বরূপিণঃ। তেভ্যো হখিলেভ্যো যোগিভ্যঃ পিতৃভ্যো যতমানসঃ। নমো নমো নমস্তে মে প্রসীদন্তু স্বধাভুজঃ। মার্কণ্ডেয় উবাচ। এবং স্তুতাস্ততস্তেন তেজসা মুনিসত্তম। নিশ্চক্রমু স্তে পিতরো ভাসয়ন্তো দিশো দশ। নিবেদিতঞ্চ যত্তেন পুষ্পগন্ধানুলেপনং। তদ্ভাসিতানাথ স তান্ দদৃশে পুরতঃ স্থিতান্। প্রণিপত্য পুনর্ভক্ত্যা পুনরেব কৃতাঞ্জলিঃ। নমস্তুভ্যং নমস্তুভ্যমিত্যাহ পৃথগাগৃতঃ। ততঃ প্রসন্নাঃ পিতরস্তমূচুর্ম্মুনিসত্তমং। বরং বৃণীষ্বেতি স তানুবাচানতকন্ধরঃ। রুচিরুবাচ। সাম্প্রতং সর্গকর্ত্তৃত্বমাদিষ্টং ব্রহ্মণা মম।

সোহহং পত্নীমভিপ্স্যামি ধন্যাং দিব্যাং প্রজাবতীং। পিতর উচুঃ। অত্রৈব সদ্যঃ পত্নীতে ভবত্বিতি মনোরমা। তস্যাঞ্চ পুত্ত্রো ভবিতা ভবতো মনুরুত্তমঃ। মন্বন্তরাধিপো ধীমাংস্তন্নাম্নৈবোপলক্ষিতঃ। রুচে রৌচ্য ইতি খ্যাতিং প্রয়াস্যতি জগত্ত্রয়ে। তস্যাপি বহবঃ পুত্ত্রা মহাবলপরাক্রমাঃ। ভবিষ্যন্তি মহাত্মানঃ পৃথিবীপরিপালকাঃ। তঞ্চ প্রজাপতির্ভূত্বা প্রজাঃ সৃষ্ট্বা চতুর্ব্বিধাঃ। ক্ষীণাধিকারো ধর্ম্মজ্ঞস্ততঃ সিদ্ধিমবাপ্স্যসি। স্তোত্রেণানেন চ নরো যোহস্মান্ স্তোষ্যতি ভক্তিতঃ। তস্য তুষ্টা বয়ং ভোগানত্যজং জ্ঞানমুত্তমং। শরীরারোগ্যমৈশ্বর্য্যং পুত্ত্রপৌত্ত্রাদিকন্তথা। বাঞ্ছদ্ভিঃ সততং স্তব্যাঃ স্তোত্রেণানেন বৈ যতঃ। শ্রাদ্ধেষু য ইমং ভক্ত্যা অস্মৎ প্রীতিকরং স্তবং। পঠিষ্যতি দ্বিজাগ্র্যাণাং বিপ্রাণাং ভুঞ্জতাং পুরঃ। স্তোত্রশ্রবণসংপ্রীত্যা সন্নিধানে কৃতে পরে। অস্মাকমক্ষয়ং শ্রাদ্ধং তদ্ভবিষ্যত্যসংশয়ং। যদ্যপ্যশ্রোত্রিয়ং শ্রাদ্ধং যদ্যপ্যুপহতং ভবেৎ। অন্যায়োপাত্তবিত্তেন যদি বা কৃত-মন্যথা। অশ্রাদ্ধার্হৈরুপহতৈরুপহারৈস্তথা কৃতং। অকালেপথবা দেশে বিধিহীনমথাপি বা। অশ্রদ্ধয়া বা পুরুষৈর্দম্ভমাশ্রিত্য যৎ কৃতং। অস্মাকং তৃপ্তয়ে শ্রাদ্ধং তথোপ্যেতদুদীরণাৎ। যত্রৈতৎ পঠ্যতে শ্রাদ্ধে স্তোত্রমস্মৎ সুখাবহং। অস্মাকং জায়তে তৃপ্তিস্তত্র দ্বাদশবার্ষিকী। হেমন্তে দ্বাদশাব্দানি তৃপ্তিমেতৎ প্রযচ্ছতি। শিশিরে দ্বিগুণাব্দাংশ্চ তৃপ্তস্তোত্রমিদং স্মৃতং। বসন্তে ষোড়শ সমা স্তৃপ্তয়ে শ্রাদ্ধকর্ম্মণি। গ্রীষ্মে চ ষোড়শৈবৈতৎ পঠিতং তৃপ্তিকারকং। বিকালেপি কৃতেশ্রাদ্ধে স্তোত্রেণানেন সাধিতে। বর্ষাসু তৃপ্তিরস্মাকমক্ষয়া জায়তে রুচে। শরৎকালেপি পঠিতং শ্রাদ্ধকালে প্রযচ্ছতি। অস্মাকমেতৎ পুরুষৈস্তৃপ্তিং

পঞ্চদশাব্দিকীং। যস্মিন্ গৃহেপি লিখিতমেতত্তিষ্ঠতি নিত্যশঃ। সন্নিধানং কৃতে শ্রাদ্ধে তত্রাস্মাকং ভবিষ্যতি। তস্মাদেতৎ ত্বয়া শ্রাদ্ধে বিপ্রাণাং ভুঞ্জতাং পুরঃ। শ্রাবণীয়ং মহাভাগ অস্মাকং তৃপ্তিহেতুকং ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি মার্কণ্ডেয়পুরাণে রৌচ্যমন্বন্তরে পিতৃবরপ্রদানং নাম রুচিস্তোত্রং সমাপ্তং ॥ * ॥

॥ * ॥ হলায়ুধ সম্মত শ্রাদ্ধকাণ্ডে প্রকাশে যত্নবানপি বিশুদ্ধাদর্শাভাবাৎ তন্ন প্রকাশ্য সাম্প্রতং রঘুনন্দনপ্রণীতং ॥ * ॥

॥ * ॥ * ॥ * ॥ শূদ্রকৃত্যং প্রকাশয়াম্যহমিতি ॥ * ॥ * ॥ * ॥

ওঁ নমো গণেশায়। প্রণম্য সচ্চিদানন্দং শূদ্রানাং ন্যায়বর্ত্তিণাং। শ্রাদ্ধাহঃ কৃত্যয়োস্তত্ত্বং বক্তি শ্রী. রঘুনন্দনঃ। অথ শ্রাদ্ধকৃত্যং। তত্র মৎস্যপুরাণং। এবং শূদ্রোঽপি সামান্যং বৃদ্ধিশ্রাদ্ধন্তু সর্ব্বদা। নমস্কারেণ মন্ত্রেণ কুর্য্যাদামান্নবদ্বুধঃ। দানপ্রধানঃ শূদ্রঃ স্যাদিত্যাহ ভগবন্ প্রভুঃ। দানেন সর্ব্বকামাপ্তিরস্য সংজায়তে যতঃ। অতো দানমেবাপেক্ষিতং নতু ভোজনমপি। সামান্যং সর্ব্বজন কর্ত্তব্যত্বেন প্রতিমাস কৃষ্ণপক্ষাদি বিহিত শ্রাদ্ধং আভ্যুদয়িক শ্রাদ্ধঞ্চ এবং দ্বিজাতিবচ্ছূদ্রোপি কুর্য্যাদিত্যন্বয়ঃ। নমস্কারেণ মন্ত্রেণ নতু স্বয়ং পঠিত মন্ত্রান্তরেণ। আমান্নবদিত্যনেন জলসেকসিদ্ধমন্নং ব্যাবৃত্যতে। স্বিন্নমন্নমুদাহৃতমিতি বশিষ্ঠ বচনেন স্বিন্নস্যৈবান্নত্বাভিধানাৎ কন্দুপক্কস্য ভৃষ্টত্বং। হারীতেন স্বিন্নভর্জনয়োঃ পৃথকত্বমুক্তং যথা আদীপন তাপন স্বেদন ভর্জন পচনাদিভিঃ পঞ্চমীতি অস্যার্থঃ আদীপনং কাষ্ঠানাং তাপনং তোয়াদে স্বেদনং ধান্যাদেঃ উর্জনং যবাদেঃ পচনং তণ্ডুলাদেরিতি পঞ্চমী সূনেতি কল্পতরুঃ। অতএব স্বিন্নধান্য তণ্ডুলেন ব্যবহ্রীয়তে। কন্দুপক্ক স্নেহপক্ক পায়সং দধিসক্তবঃ। দ্বিজৈরেতানি ভোজ্যানি শূদ্রগেহকৃতান্যপি। ইতি কূর্ম্মপুরান বচনে শূদ্রকর্তৃক কন্দুপক্কাদে ব্রাহ্মণ ভক্ষ্যত্বেনাপি শ্রাদ্ধে দেয়ত্বং যুক্তং। কন্দুপক্কং জলোপসেকং বিনা কেবল পাত্রে বহ্নিনা যৎ পক্কং। পায়সং পাকেন কাঠিন্য বিকারাপন্নং দুগ্ধং পরং মান্নং পরত্বে পুংলিঙ্গ নির্দ্দেশাপত্তেঃ। তথা চামরঃ পরমান্নন্তু পায়স ইতি। এবঞ্চ দিনে ত্রয়োদশে প্রাপ্তে পাকেন ভোজয়েদ্দ্বিজান্। ইয়ং বিধিঃ প্রয়োক্তব্যা শূদ্রাণাং মন্ত্রবর্জ্জিতা। ইতি শ্রাদ্ধচিন্তামণিধৃত বরাহপুরাণবচনমপি কন্দুপক্কপরং। এতেন এতদ্বচনদ্বয়ং সচ্ছূদ্রপরমিতি মৈথিলোক্তং হেয়ং। এবমামস্যাপি শ্রাদ্ধে দেয়ত্বং সামগশ্রাদ্ধতত্ত্বে অনুসন্ধেয়ং। ৪৪০

তত্র দ্রব্য দেবতা প্রকাশায় ব্রাহ্মণেন মন্ত্রাঃ পাঠ্যাঃ। অয়মেব বিধিঃ প্রোক্তাঃ শূদ্রাণাং মন্ত্রবর্জ্জিতঃ। অমন্ত্রস্য তু শূদ্রস্য
বিপ্রো মন্ত্রেণ গৃহ্যতে ইতি বরাহ পুরাণাৎ। অয়ং শ্রাদ্ধেতিকর্ত্তব্যতা বিধিঃ শূদ্রকর্ত্তৃক মন্ত্র পাঠ রহিতঃ শূদ্রস্য মন্ত্র পাঠা-
নধিকার সিদ্ধৌ যদমন্ত্রস্যেতি পুনর্বচনং তৎ স্ত্রিয়া গ্রহণার্থং পরিভাষার্থঞ্চ ততশ্চ তৎ কর্ম্ম সম্বন্ধি মন্ত্রেণ বিপ্রস্তদীয় কর্ম্মকার-
য়িতৃ ব্রাহ্মণো গৃহ্যতে সম্বধ্যতে তেন মন্ত্রঃ পঠনীয় ইতি তাৎপর্য্যং তত্র যজুর্ব্বেদিকো মন্ত্রঃ। তথা চ স্মৃতিঃ আর্যক্রমেণ
সর্ব্বত্র শূদ্রা রাজসনেয়িনঃ। তস্মাচ্ছূদ্রঃ স্বয়ং কর্ম্ম যজুর্ব্বেদেন কারয়েৎ। আর্য্যক্রমেণ সূত্রোক্ত ক্রমেণ যজুর্ব্বেদ সম্বন্ধি
গৃহ্যাদিনা। চতুর্ণামপি বর্ণানাং যানি প্রোক্তানি শ্রেয়সে। ধর্ম্ম শাস্ত্রাণি রাজেন্দ্র শৃণু তানি নৃপোত্তম। বিশেষতস্তু শূদ্রাণাং
পাবনানি মনীষিভিঃ। অষ্টাদশ পুরাণানি চরিতং রাঘবস্য চ। রামস্য কুরুশার্দ্দূল ধর্ম্মকামার্থ সিদ্ধয়ে। তথোক্তং ভারতং
বীর পারাশর্য্যেণ ধীমতা। বেদার্থং সকলং যোজ্য ধর্ম্মশাস্ত্রাণি চ প্রভো। ইতি ভবিষ্য পুরাণাত্তেষাং পৌরাণিকো বিধিঃ
শ্রেষ্ঠঃ। যোজ্য যোজয়িত্বা অত্র চ বেদমন্ত্র বর্জ্জং শূদ্রস্যেতি বচনে বেদেত্যুপাদানাৎশ্রাদ্ধেঽপি পৌরাণিকো মন্ত্রঃ শূদ্রেণ পঠনীয় 
ইতি মৈথিলৈরুক্তং তন্ন বরাহপুরাণে শূদ্রাণাং মন্ত্র বর্জ্জিত ইত্যনেন মন্ত্রমাত্র নিষেধাৎ। মৎস্যপুরাণে নমস্কারেণ মন্ত্রেণেত্যুপাদানাচ্চ
পৌরাণিকস্যাপি শ্রাদ্ধে নিষেধ প্রতীতেঃ। এবঞ্চ স্নানে। ব্রহ্মক্ষত্র বিশামেব মন্ত্রবৎ স্নানমিষ্যতে। তুষ্ণীমেবহি শূদ্রস্য সনম-
স্কারকং মতমিত্যনেন নমস্কার মাত্র বিধানাৎ। পঞ্চ যজ্ঞেঽপি। শূদ্রস্য দ্বিজশুশ্রূষা তয়া জীবন্ বণিগ্ভবেৎ। শিল্পৈ র্বা
বিবিধৈ র্জীবেদ্দ্বিজাতিহিতমাচরন্। ভার্য্যারতিঃ শুচির্ভৃত্য ভর্ত্তা শ্রাদ্ধক্রিয়ারতঃ। নমস্কারেণ মন্ত্রেণ পঞ্চ যজ্ঞান্ন হাপ-

য়েৎ। ইত্যনেন নমস্কার মাত্র বিধানাৎ শ্রাদ্ধাদিষু পৌরাণিক মন্ত্রনিষেধঃ। ততশ্চ শ্রাদ্ধ স্নান পঞ্চ যজ্ঞেতরত্র শূদ্রস্য পৌরাণিক মন্ত্রপাঠঃ প্রতীয়তে। অত্র ষষ্ঠেঽন্নপ্রাশনং মাসি যদ্বেষ্টং মঙ্গলং কুলে ইতি মনুবচনাচ্চূড়া কার্য্যা যথাকুলমিতি যাজ্ঞবল্ক্যবচনাচ্চ সংস্কারমাত্র কুলধর্ম্মানুরোধেন কালান্তরস্য নাম মঙ্গল বিশেষোচ্চারণস্যাভিধানাৎ শূদ্রাণাং নামকরণে বসু-ঘোষাদি পদ্ধতিযুক্ত নামকরণস্য চ প্রতীতে বৈদিক কর্ম্মণি শূদ্রাণাং পদ্ধতিযুক্ত নামাভিধানং। শূদ্রস্ত্বাচমনে দেবতীর্থেন ওষ্ঠে সকৃজ্জলং ক্ষিপেৎ ন তু পিবেৎ। তথা চ যাজ্ঞবল্ক্যঃ। হৃৎকণ্ঠতালুগাভিস্তু যথা সংখ্যং দ্বিজাতয়ঃ। শুধ্যেরন্ স্ত্রী চ শূদ্রশ্চ সকৃৎ স্পৃষ্টাভিরন্ততঃ। অন্ততো হৃদাদি সমীপে ন তু ওষ্ঠে উত্তরোত্তরমপকর্ষাৎ অতএব স্পৃষ্টাভিরিত্যুক্তং ন তু ভক্ষিতাভিরিতি। স্ত্রী শূদ্রঃ শুধ্যতে নিত্যং কালানাচ্চ করোষ্ঠয়োরিতি ব্রহ্মপুরাণাচ্চ। যাজ্ঞবল্ক্যঃ। প্রাগ্বা ব্রাহ্মেণ তীর্থেন দ্বিজো নিত্যমুপস্পৃশেৎ। অত্র দ্বিজস্যৈবাচমনে ব্রাহ্মতীর্থোপদেশাৎ স্ত্রীশূদ্রয়োর্ন তেনাচমনং। এবং মিতাক্ষরায়াং ব্যক্ত-মুক্তং মরীচিনা। স্ত্রিয়াস্ত্বৈন্দ্রদর্শিকং তীর্থং শূদ্রজাতেস্তথৈব চ। সকৃদাচমনাৎ শুদ্ধিরেতয়োরেব চোভয়োঃ। এতদনন্তরমিন্দ্রিয়াদি স্পর্শনন্তু ব্রাহ্মণবদেব প্রমাণানন্তরং সামগরাজসনেয়িনোঃ শ্রাদ্ধাহ্নিকতত্ত্বয়োরনুসন্ধেয়ং॥ * ॥ * ॥

অথ পার্ব্বণশ্রাদ্ধ প্রয়োগঃ। শ্রাদ্ধ পূর্ব্বদিনে কৃতনিরামিষৈকভোজনঃ স্বঃ কর্ত্তব্যানিশ্চয়ে তদ্রহিতোপি ততঃ পরদিনে কৃতদেবপূজান্তক্রিয়ো দ্বিবাসা দক্ষিণাপ্লবনে দেশে দক্ষিণাভিমুখী ভুয় বামপাদক্রমেণ কৃতপাদশৌচো দর্ভহস্তঃ প্রাঙ্মুখ উদঙ্মুখো বা দৈব তীর্থেন জলেন সকৃদোষ্ঠস্পর্শেনাচম্য পাষাণেষ্টক শর্করাস্থি যুক্তাং পঙ্কিলাং স্রবজ্জলাং কৃমিযুতাং সঙ্কটাং দুর্গন্ধামনিষ্টশব্দাং ভূমিং ত্যক্ত্বা উপলিপ্তায়াং ভূমৌ সদর্ভাসনে চোপবিশ্য ঘৃতেন তিলতৈলেন বা দীপং সংস্থাপ্য নমো বাস্তুপুরুষায় নম ইতি বাস্তুং সংপূজ্য ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততম্। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং দত্ত্বা পরকীয় ভূমৌ চেত্তুস্বামিনে মূল্যমথবা পিতৃরীত্যা ইদমন্নং নমো ভূস্বামি পিতৃভ্যো নম ইতি দদ্যাৎ। এতচ্চ স্বভূমাবস্বামিক ভূমৌ চ ন দদ্যাৎ। অস্বামিকাশ্চ। অটব্যঃ ১৪৩
পর্ব্বতা নদ্যঃ নদীপ্রাবাহাদুভয়তশ্চতুর্হস্তাবচ্ছিন্না ভূময়ঃ পুণ্যানি পুরুষোত্তমাদীনামায়তনানি গয়াদীনি ক্ষেত্রাণি দণ্ডকাদীন্যা-রণ্যানি পুণ্যানি মহানদীনান্তু গঙ্গাদীনাং গর্ভস্তদুপরি সার্দ্ধহস্তশতং তীরং তদুপরি উভয়তঃ ক্রোশদ্বয়ং গঙ্গাক্ষেত্রং এতা ভূময়ো রাজাদিভিঃ স্ববশীকৃতা অপি অস্বামিকাঃ। সর্ব্বং দৈবকৃত্যমুত্তরামুখঃ পাতিত দক্ষিণজানুরুপবীতী। সর্ব্বং পিতৃকৃত্যং দক্ষিণামুখঃ প্রাচীনাবীতী পাতিতবামজানুঃ। দৈবে প্রাঙ্মুখ দ্বিদর্ভযুক্ত যবোদকপ্রোক্ষিতমাসনদ্বয়ং পিত্র্যে তিলোদক প্রোক্ষিত দক্ষিণাগ্রৈক দর্ভযুক্তাসনদ্বয়ং দক্ষিণাদিশ্যুপকল্প্য প্রণবোচ্চারণ পূর্ব্বকং সার্দ্ধ দ্বিতয় বেষ্টন যুক্তের্দ্ধকেশ সপ্তপঞ্চান্য তর দর্ভনির্ম্মিতং দর্ভবটুদ্বয়ং দৈবে পশ্চিমাগ্রত্বেন প্রাঙ্মুখত্বং। পিত্র্যে দক্ষিণাগ্রত্বেন ওঁ উদঙ্মুখত্বং এবং মাতামহ সম্বন্ধিনং

দৈব পিতৃমাতামহাসনেষু নিধায় দৈবে জলগণ্ডূষং দত্ত্বা নমোঽদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য পিতুরমুক
দত্ত দাসস্যামুক গোত্রস্য পিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য প্রপিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য মাতামহস্য অমুক
গুপ্ত দাসস্যামুক গোত্রস্য প্রমাতামহস্যামুক গুপ্তদাসস্যামুক গোত্রস্য বৃদ্ধ প্রমাতামহস্যামুক গুপ্ত দাসস্য পার্ব্বণশ্রাদ্ধে
কর্ত্তব্যে পুরূরবো মাদ্রবসোর্ব্বিশ্বেষাং দেবানাং পার্ব্বণশ্রাদ্ধং দর্ভময় ব্রাহ্মণয়োরহং করিষ্যে ইতি পৃচ্ছেৎ ওঁ কুরুষ্বেতি
ব্রাহ্মণ প্রতিবচনং এবং বাক্যান্তরে পদ্ধতেরুল্লেখঃ পর্ব্বেতরত্র পার্ব্বণ বিধিনা শ্রাদ্ধমিতি সর্ব্বত্র প্রয়োক্তব্যং। ততো দক্ষিণা-
মুখঃ পাতিত বামজানুঃ প্রাচীনাবীতি পিতৃব্রাহ্মণে জলগণ্ডূষং দত্ত্বা নমোঽদ্যামুকে মাস্যামুক পক্ষে অমুক তিথৌ অমুক গোত্রস্য
পিতুরমুক দত্ত দাসস্যামুক গোত্রস্য পিতামহস্যামুক দত্ত দাসস্যামুক গোত্রস্য প্রপিতামহস্যামুক দত্ত দাসস্য পার্ব্বণশ্রাদ্ধং দর্ভ-
ময় ব্রাহ্মণেঽহং করিষ্যে ইতি পৃচ্ছেৎ ওঁ কুরুষ্বেতি প্রতিবচনম্। ততো মাতামহ পক্ষে জলগণ্ডূষং দত্ত্বা নমোঽদ্যামুকে
মাস্যামুক পক্ষেঽমুক তিথৌ অমুক গোত্রস্য মাতামহস্যামুক গুপ্ত দাসস্যামুক গোত্রস্য প্রমাতামহস্যামুক গুপ্ত দাসস্যামুক
গোত্রস্য বৃদ্ধপ্রমাতামহস্যামুক গুপ্ত দাসস্য পার্ব্বণশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে ওঁ কুরুষ্বেতি প্রতিবচনম্। ততঃ সপ্রণব
ব্যাহৃতিকাং গায়ত্রীং জপ্ত্বা। ওঁ দেবতাভ্যঃ পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি।
ইতি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। ততঃ পুণ্ডরীকাক্ষং স্মৃত্বা যজ্ঞজলেন শ্রাদ্ধীয় দ্রব্য প্রোক্ষণং কর্ত্তব্যং রক্ষার্থ-
মুদক পূর্ণপাত্রমেক দেশে স্থাপয়েৎ। ততো বামোত্তরীয় উদঙ্মুখঃ পাতিত দক্ষিণজানু ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা নমঃ পুরূ-

রবো মাদ্রবসৌ বিশ্বে দেবা এতদ্বো দর্ভাসনং নম ইতি ঋজুদর্ভান্ দেবব্রাহ্মণদক্ষিণ পার্শ্বে দদ্যাৎ। ততো দক্ষিণামুখো
দক্ষিণোত্তরীয়ঃ পাতিত বামজানুঃ পিতৃব্রাহ্মণে জলং দত্ত্বা নমোঽমুক গোত্র পিতরমুক দত্ত দাস অমুক গোত্র পিতামহা-
মুক দত্ত দাস অমুক গোত্র প্রপিতামহামুক দত্ত দাস এতত্তে দর্ভাসনং নম ইতি দক্ষিণাগ্রদ্বিগুণ ভুগ্নদর্ভত্রয়রূপ মোটকং
পিতৃব্রাহ্মণ বামপার্শ্বে দদ্যাৎ। ততো জলং স্পৃষ্ট্বা মাতামহ ব্রাহ্মণে জলং দত্ত্বা নমোঽমুক গোত্র মাতামহামুক গুপ্ত দাস
অমুক গোত্র প্রমাতামহামুক গুপ্ত দাস অমুক গোত্র বৃদ্ধপ্রমাতামহামুক গুপ্তদাস এতত্তে দর্ভাসনং নম ইতি মোটকং মাতামহ
ব্রাহ্মণ বামপার্শ্বে দদ্যাৎ। ততো দৈবে বামোত্তরীয় উত্তরা মুখো যবান্ গৃহীত্বা নমো বিশ্বান্ দেবানাবাহয়িষ্যে ইতি পৃচ্ছেৎ।
ওঁ আবাহয়েত্যনুজ্ঞাতঃ ওঁ বিশ্বেদেবাস আগত শৃণুতা ম ইমং হবং এদং বর্হির্নিষীদত ইতি ব্রাহ্মণেন পঠিতে নমো নম 
ইত্যুক্ত্বা তূষ্ণীং যবান্ বিকীরেৎ। ততঃ কৃতাঞ্জলিঃ। ওঁ বিশ্বে দেবাঃ শৃণুতেমং হবং যে যে হন্তরীক্ষে য উপদ্য বিষ্ঠ যে
অগ্নিজিহ্বা উত বা যজত্রা আসাদ্যাস্মিন্ বর্হিষি মাদয়ধ্বং ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো দক্ষিণা-
মুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানু স্তিলান্ গৃহীত্বা নমঃ পিতৃনাবাহয়িষ্যে ইতি পংক্তিশ্রেষ্ঠং ব্রাহ্মণং পৃচ্ছেৎ ওঁ আবা-
হয়েত্যনুজ্ঞাত ওঁ উশন্তস্ত্বা নিধীমহ্যুশন্তঃ সমিধীমহি উশন্নুশত আবহ পিতৃন্ হবিষে অত্তবে ইতি ব্রাহ্মণেন পঠিতে নমো নম
ইত্যাবাহ্য। ওঁ আয়ান্তু নঃ পিতরঃ সোম্যাসো হগ্নিস্বাত্তাঃ পথিভির্দেবযানৈরস্মিন্ যজ্ঞে স্বধয়া মদন্তো হধি ব্রুবন্তু তে অবন্ত্বস্মান্
ইতি। ওঁ অপহতা সুরারক্ষাংসি বেদিষদ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন তিলান্ বিকীর্য্য জলং স্পৃষ্ট্বা দৈবে

পূর্ব্বাগ্র দর্ভোপরি পিত্রে দক্ষিণাগ্র দর্ভোপরি সপ্ত পাত্রাণি সংস্থাপ্য ওঁ পবিত্রে স্থো বৈষ্ণব্যাবিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেনানখচ্ছিন্নং। ওঁ বিষ্ণোর্মনসা পূতে স্থ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন প্রোক্ষিতং পবিত্রমেকৈকস্মিন্ পাত্রে একৈকং বিন্যস্য তেষু ওঁ শন্নো দেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভি স্রবন্তু ন ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন দৈবাদি ক্রমেণ জলং দদ্যাৎ। ততো দৈবে। ওঁ যবোঽসি যবয়াস্মদ্দ্বেষো যবয়ারাতীঃ। ওঁ দিবে ত্বা অন্তরীক্ষায় ত্বা পৃথিব্যৈ ত্বা শুন্ধন্তাং লোকাঃ পিতৃসদনমসি ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি যবান্ বিকী- রেৎ। ততঃ পিত্রাদি পাত্রেষু ওঁ তিলোঽসি সোম দেবত্যো গোসবো দেবনির্ম্মিতঃ প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া পিতৄন্ লোকান্ প্রীণাহি নঃ স্বাহা। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা প্রত্যেকং তিলান্দদ্যাৎ। ততো দৈবাদি ক্রমেণ তুষ্ণীং গন্ধ পুষ্পে দত্ত্বা ব্রাহ্মণ হস্তে প্রাগগ্রং পবিত্রং দত্ত্বা জলান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ শিরঃ প্রভৃতি সর্ব্বগাত্রেভ্যো নম ইতি পূজ- য়েৎ। ততো বামহস্তেন পাত্রং গৃহীত্বা ওঁ যা দিব্যা আপঃ পয়সা সংবভুবুর্যা অন্তরীক্ষা উত পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞি- য়াস্তা ন আপঃ শিবাঃ শংস্যোনাঃ সুহবা ভবন্তু। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য। নমঃ পুরূরবো মাদ্রবসো বিশ্বে দেবা এষ বো ঽর্ঘ্যো নমঃ। ইতি দেবব্রাহ্মণে ঽর্ঘ্যং দদ্যাৎ। ততো দক্ষিণামুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানুঃ পিতৃব্রাহ্মণে দক্ষিণাগ্রং পবিত্রং দত্ত্বা পূর্ব্ববজ্জলান্তরাদি দত্ত্বা ওঁ যাদিব্যা ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা নমো ঽমুক গোত্র পিতরমুক দত্ত দাস এষ তে অর্ঘ্যো নম। ইতি ব্রাহ্মণে ঽর্ঘ্যং দত্ত্বা পাত্রস্থ শেষ জলরূপ সংস্রব

সহিত পাত্রং পূর্ব্বস্থানে স্থাপয়েৎ। এবং প্রত্যেকং জলং স্পৃষ্ট্বা পিতামহাদি পঞ্চভ্যোঽর্ঘ্যং দত্ত্বা সংস্রব সহিত পাত্রাণি
যথাস্থানং সংস্থাপ্য পিতৃপাত্রে পিতামহাদি পঞ্চ পাত্রসংস্রবং গৃহীত্বা প্রপিতামহপাত্রেণ পিধায় স্ববামে সমূলদর্ভো-
পরি নমঃ পিতৃভ্যঃ স্থানমসীত্যনেন ন্যুব্জং কুর্য্যাৎ। ততো দৈবে উত্তরাভিমুখো বামোত্তরীয়ঃ পাতিতদক্ষিণজানুঃ পুরূ-
রবো মাদ্রবসৌ বিশ্বে দেবা এতানি বো গন্ধ পুষ্প ধূপ দীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ
বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনং ইত্যনেন সমর্পয়েৎ। ততো দক্ষিণা মুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানুঃ
নমো হমুক গোত্র পিতরমুক দত্ত দাস অমুক গোত্র পিতামহামুক দত্ত দাস অমুক গোত্র প্রপিতামহামুক দত্ত দাস এতানি তে
গন্ধ পুষ্প ধূপ দীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপ এষ তে দীপঃ এতত্ত আচ্ছাদনং
ইতি নিবেদয়েৎ। তত্র দ্রব্যাভাবে যবান্দদ্যাৎ। এবং মাতামহাদীনামপি দদ্যাৎ। ততো দৈবাদি ক্রমেণ ব্রাহ্মণাগ্রস্থিতং ৪৪৭
কুশাদিকং সমস্তমেবাপনীয় দৈবে ঐশানীমারভ্য প্রাগগ্রান্তয়া রেখয়া দক্ষিণাবর্ত্তেন পিত্র্যে নৈর্ঋতীমারভ্য দক্ষিণাগ্রান্তয়া
রেখয়া বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা ভোজন পাত্রাণি দৈবাদি ক্রমেণ তত্রৈব স্থাপয়েৎ। ততঃ সঘৃতমন্নমাদায় নমো-
হগ্নৌ করিষ্যে ইতি ব্রাহ্মণং পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনং। ওঁ অগ্নয়ে কব্যবাহনায় স্বাহা। ইতি ব্রাহ্মণেন পঠিতে
নমো নমঃ ইত্যুক্ত্বা জলে জুহুয়াৎ। ওঁ সোমায় পিতৃমতে স্বাহা। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা জলে জুহু-
য়াৎ। ততো হুতশেষং দেব …াত্রে বারদ্বয়ং পিতৃ পাত্রে বার…

ওঁ পৃথিবী [illegible] পাত্রং দৌ[illegible]
য়েৎ। ততো দেবপাত্রমনুত্তা[illegible]হস্তাভ্যাং ধৃত্বা। ওঁ পৃথিবী তে পাত্রমিত্যাদি
স্বাহা। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। পিত্রো তু উত্তানহস্তাভ্যাং ধৃত্বা ওঁ পৃথিবী তে পাত্রমিত্যাদি
ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। এবং মাতামহ পক্ষেঽপি। ততো দেবাদি ক্রমেণান্নাদিকং পাত্রান্তরিত হস্তাভ্যাং
পত্নী স্বয়ং বা পরিবেশয়েৎ। উপকরণন্তু পাত্রান্তরে কৃত্বা ভূমৌ স্থাপয়েৎ। পাত্রান্তরাসত্ত্বে ভোজন পাত্রে দদ্যাৎ। ন তু
পাত্রান্তরে কৃত্বা পাত্রোপরি স্থাপয়েৎ। সীসকায়সপাষাণাষ্টাঙ্গুলন্যূন ভগ্ন মৃণ্ময় পাত্রাণি বর্জ্জয়েৎ। ভগ্নমপি তাম্রপাত্রং গ্রাহ্যং।
কুষ্মাণ্ডালাবু বার্ত্তাকী পালঙ্কীরাজিকা দ্বিঃস্বিন্নাদি পরিবর্জ্জয়েৎ। তত ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়-
মস্য পাংশুলে। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা ইদং হবিরিত্যুচ্চার্য্য অন্নাদাবনখমঙ্গুষ্ঠং ক্ষিপেৎ। ততো দৈবে
তূষ্ণীং যবান্ বিকীর্য্য পিতৃপক্ষে। ওঁ অপহতা সুরারক্ষাংসি বেদিষদ। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুক্ত্বা তিলান্
বিকীর্য্য অন্নে মধু দত্ত্বা তদভাবে গুড়ং দত্ত্বা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং। ওঁ মধুবাতেত্যাদি ওঁ মধু মধু মধ্বিতি চ
ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো দৈবে উত্তরামুখো হন্নং প্রোক্ষ্য বামহস্তেনান্নপাত্রং ধৃত্বা নমঃ পুরূরবো
মাদ্রবসৌ বিশ্বে দেবা এতদ্বো হন্নং সোপকরণং নম ইত্যুৎসৃজেৎ। ততো দক্ষিণা মুখো দক্ষিণোত্তরীয়ঃ পাতিত বামজানু-
র্ব্বামহস্তেনান্ন পাত্রং ধৃত্বা নমো হমুক গোত্র পিতরমুক দত্ত দাস অমুক গোত্র পিতামহামুক দত্ত দাস অমুক গোত্র প্রপিতা-
মহামুক দত্ত দাস এতত্তে হন্নং সোপকরণং নম ইত্যুৎসৃজেৎ। এবং মাতামহ পক্ষেপি। ততঃ প্রত্যেকং জলগণ্ডূষং দদ্যাৎ।

ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা। ওঁ মধুবাতেত্যাদি ওঁ মধু মধু মধ্বিতি চ। ওঁ অন্নহীনং ক্রিয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। তৎ সর্ব্বমচ্ছিদ্রমস্তু ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততঃ শ্রব্যং ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। তদ্যথা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ মধুবাতা ইত্যাদিতৃচং ওঁ মধু মধু মধ্বিতি চ। ওঁ যজ্ঞেশ্বরো হব্য সমস্ত কব্য ভোক্তাব্যয়াত্মা হরিরীশ্বরোঽত্র তৎ সন্নিধানাদপযান্তু সদ্যো রক্ষাংস্যশেষান্যসুরাশ্চ সর্ব্বে। ওঁ যোগীশ্বরং যাজ্ঞবল্ক্যং সংপূজ্য মুনয়োঽব্রুবন্। বর্ণাশ্রমেতরাণান্নো ব্রূহি ধর্ম্মানশেষতঃ। মন্বত্রি বিষ্ণু হারীত যাজ্ঞবল্ক্যোশনোঽঙ্গিরাঃ। যমাপস্তম্বসম্বর্ত্তাঃ কাত্যায়নবৃহস্পতী। পরাশর ব্যাস শঙ্খ লিখিতা দক্ষগোতমৌ। শাতাতপো বশিষ্ঠশ্চ ধর্ম্মশাস্ত্র প্রযোজকাঃ। ইতি যাজ্ঞবল্ক্যোক্ত শ্লোকত্রয়ং ওঁ তদ্বিষ্ণোঃ পরমং পদমিত্যাদি। ওঁ দুর্য্যোধনো মন্যুময়ো মহাদ্রুমঃ স্কন্ধঃ কর্ণ শকুনিস্তস্য শাখা দুঃশাসনঃ পুষ্পফলে সমৃদ্ধে মূলং রাজা ধৃতরাষ্ট্রোঽমনীষী। ওঁ যুধিষ্ঠিরো ধর্ম্মময়ো মহাদ্রুমঃ স্কন্ধোঽর্জ্জুনো ভীমসেনোঽস্য শাখা মাদ্রীসুতৌ পুষ্পফলে সমৃদ্ধে মূলং কৃষ্ণ ব্রহ্ম চ ব্রাহ্মণাশ্চ। ওঁ সপ্তব্যাধা দশার্ণেষু মৃগাঃ কালঞ্জরেগিরৌ। চক্রবাকাঃ সরদ্বীপে হংসাঃ সরসি মানসে। তেঽপি জাতাঃ কুরুক্ষেত্রে ব্রাহ্মণা বেদপারগাঃ। প্রস্থিতা দূরমধ্বানাং যূয়ং তেভ্যোঽবসীদত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো দক্ষিণাগ্রান্ সতিলান্ দর্ভাসনাস্তীর্য্য ভূমিং প্রোক্ষ্য সর্ব্বপ্রকার মন্নমুদ্ধৃত্য সতিলমেকীকৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যে প্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিং। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্ন সিদ্ধির্নস্তথান্নমস্তি। তত্তৃপ্তয়ে ঽন্নং ভুবি দত্তমেতৎ

প্রয়ান্তু লোকায় সুধায় তদ্বৎ। ইতি ব্রাহ্মণেন পঠিতে নমো নম. ইত্যুচ্চার্য্য কুশোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণ শ্রবণং স্পৃষ্ট্বা বা হরিং স্মৃত্বা পিত্রাদি ব্রাহ্মণেভ্যঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গায়ত্রীং ওঁ মধুবাতেত্যাদিকং ওঁ মধু মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতো নমো নম ইত্যুচ্চার্য্য নমঃ শেষমন্নং ক্ব দেয়ং ইতি পৃচ্ছেৎ। ওঁ ইষ্টেভ্যো দীয়তামিতি প্রতিবচনং। নমঃ পিণ্ডদানমহং করিষ্যে ইতি প্রশ্নং কুর্য্যাৎ। ওঁ কুরুষেতি তেনোক্তে ব্রাহ্মণসংমুখে ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বেঽসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচ সংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নৈর্ঋতীমারভ্য দক্ষিণাগ্রান্তয়া রেখয়া বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা তৎ পূর্ব্বদিশি তথাবিধমপর মণ্ডলং কৃত্বা তত্র প্রাদেশমাত্র সাগ্রকুশপত্রদ্বয়ং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা বামহস্তান্বারব্ধ দক্ষিণ পাণিনা দক্ষিণাগ্রাং রেখাং ওঁ অপহতা ইত্যাদি। ওঁ নিহন্মীত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য মধ্যস্থানে কুর্য্যাৎ। তদ্দর্ভদ্বয়মুত্তরস্যাং দিশি ক্ষিপেৎ। রেখোপরি সমূলান্ সাগ্রান্ কুশানাস্তীর্য্য। ওঁ দেবতাভ্য ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য ওঁ অপহতা ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি তিলান্ বিকীর্য্য বামহস্তেন সতিলজলং গৃহীত্বা বামহস্তাদ্দক্ষিণ হস্তেন সংগৃহ্য নমো ঽমুক গোত্র পিতরমুক দত্তদাস অবনেনিক্ষ্ব নম ইত্যুচ্চার্য্য অবনেজনমাস্তীর্ণ কুশমূলে দদ্যাৎ। এবং পিতামহাদি পঞ্চভ্যঃ প্রত্যেকং জলস্পর্শ পূর্ব্বকং মধ্যাগ্র দেশক্রমেণ দদ্যাৎ। ততো হস্তৌ করণশেষং শ্রাদ্ধশেষমন্নং ব্যঞ্জনাদিকঞ্চ তিলমধ্বাজ্যযুক্তমেকস্মিন্ পাত্রে কৃত্বা ষট্ পিণ্ডান্নির্ম্মায় মধ্বভিঘারিতান্ কৃত্বা বামহস্ত

গৃহীতপাত্রাদ্দক্ষিণ হস্তেনৈকং গৃহীত্বা নমোঽমুক গোত্র পিতরমুক দত্ত দাস এতত্তে পিণ্ডং নমঃ। ইতি বামহস্তান্বারব্ধ দক্ষিণ হস্তেন দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শপূর্ব্বকং পিতামহাদি পঞ্চ পিণ্ডানবনেজেন স্থানে দদ্যাৎ। হস্তলেপঞ্চ পিতৃপক্ষাস্তীর্ণ কুশমূলে লেপভুজঃ পিতরঃ প্রীয়ন্তামিতি নিম্ৰয্য হস্তং প্রক্ষাল্যাচম্য হরিং স্মৃত্বা ওঁ অত্র পিতরো মাদায়ধ্বমিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য বামাবর্ত্তেনোদঙ্মুখো ভূত্বা আগমনাচ্ছ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ সর্ব্বান্ পিতৃন্ ভাস্বর মূর্ত্তিকাংস্তত্রস্থান্ ধ্যায়ন্ ওঁ অমীমদন্ত পিতরো যথা ভাগমাবৃষায়িষত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য শ্বাসং ত্যজেৎ। আচারাচ্চ পিণ্ডান্তিকে পিণ্ডশেষং বিকীরন্তি। ততঃ পূর্ব্বাবনেজনাবশিষ্ট জলেন নমোঽমুক গোত্র পিতরমুক দত্ত দাস প্রত্যবনেনিক্ষ্ব নম ইত্যনেন প্রত্যবনেজয়েৎ। ততো নীবীং বিস্রংস্যাচম্য কৃতাঞ্জলিঃ। ওঁ নমো বঃ পিতরঃ শুষ্মায় ওঁ নমো বঃ পিতরস্তপসে ওঁ নমো বঃ পিতরো যজ্জীবস্তস্মৈ ওঁ নমো বঃ পিতরো রসায় ওঁ নমো বঃ পিতরো ঘোরায় মন্যবে ওঁ স্বধায়ৈ বঃ পিতরো নমঃ। ইতি কাণ্বশাখিনাং। গৌড়ানাং ওঁ বসন্তায়েত্যাদি ঋতু নমস্কাররূপে ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য ওঁ নমো বঃ পিতরো রসায় ওঁ নমো বঃ পিতরঃ শুষ্মায় ওঁ নমো বঃ পিতরো জীবায় ওঁ নমো বঃ পিতরঃ স্বধায়ৈ ওঁ নমো বঃ পিতরো ঘোরায় ওঁ নমোবঃ পিতরো মন্যবে ইতি মাধ্যন্দিন শাখিনাং। বসন্তাদি ষড়ৃতু রূপতয়া পিতৃনমস্কারে ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য ওঁ নমো বঃ পিতর ইতি কব্যবাহনাদিরূপতয়া ব্রাহ্মণেন মন্ত্র পঠিতে নমো নম ইত্যুচ্চার্য্য ওঁ গৃহান্নঃ পিতরো দত্ত, ইতি ব্রাহ্মণেন পঠিতে নমো নমঃ ইত্যুক্ত্বা পিতৃন্ বরং প্রার্থ্য

ওঁ সদো বঃ পিতরো দেষ্ম ইতি ব্রাহ্মণেন পঠিতে পারিভাষিক তয়াঙ্গীকৃত্য কৃতাঞ্জলির্নমো নম ইতি জপেৎ। ততো নবমনবগ্না শুক্লবস্ত্র দশাভবং সূত্রং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা ওঁ এতদ্বঃ পিতরো বাস ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমোঽমুক গোত্র পিতরমুক দত্ত দাস এতত্তে বাসো নম ইতি বামহস্তান্বারব্ধ দক্ষিণ হস্তেন পিতৃপিণ্ডে দদ্যাৎ। ততঃ প্রত্যেকং জলস্পর্শ পূর্ব্বকং পঞ্চসু পিণ্ডেষু এবমেব সূত্র তন্তূন্ দদ্যাৎ। ততস্তস্থানেব পিতৄনুদ্দিশ্য সিঞ্চেৎ। ততঃ পিণ্ডেষু তুষ্ণীং গন্ধাদিনা পূজয়েৎ। ততঃ ওঁ সুসুপ্রোক্ষিতমস্ত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন ব্রাহ্মণাগ্রভূমি মাসিঞ্চেৎ। ততো দেবপূর্ব্বকং প্রত্যেকং ওঁ শিবা আপঃ সন্ত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন ব্রাহ্মণে জলং দদ্যাৎ ওঁ সন্ত্বিতি প্রতিবচনং। সৌমনস্যমস্ত্বিতি পুষ্পং দদ্যাৎ ওঁ অস্ত্বিতি প্রতিবচনম্ ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্ত ইত্যক্ষতান্ দদ্যাৎ অস্ত্বিতি প্রতিবচনং। ততস্তিলাজ্য মধুসংযুক্তং জলং গৃহীত্বা নমো ঽমুক গোত্রস্য পিতরমুক দত্ত দাসস্য দত্তমিদমন্ন পানাদিক মক্ষয্যমস্ত ইতি দদ্যাৎ ওঁ অস্ত্বিতি প্রতিবচনম্। এবং পিতামহাদীনাং পঞ্চানাং। ওঁ অঘোরাঃ পিতরঃ সন্ত ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ গোত্রং নো বর্দ্ধতামিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ বর্দ্ধতামিতি প্রতিবচনং। ততঃ কৃতাঞ্জলিঃ সুমনস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ পিতৄন্ বরং যাচেৎ। ওঁ দাতারো নো ঽভিবর্দ্ধন্তাং বেদঃ সন্ততিরেবচ। শ্রদ্ধা চ নো মা ব্যগমদ্বহু দেয়ঞ্চ নো ঽস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি। যাচিতারশ্চ নঃ সন্ত মা চ যাচিষ্ম কঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং দাতা শতং জীবতু। যেভ্যঃ ৪৫২

সংকল্পিতা দ্বিজাস্তেষা মক্ষয়া তৃপ্তিরস্তু এতাঃ সত্যা আশিষঃ সন্তু ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ ওঁ সন্ত্বিতি প্রতিবচনং। ততঃ সপবিত্র দর্ভান্ পিণ্ডানামুপর্য্যাস্তীর্য্য নমঃ স্বধাং বাচয়িষ্যে ইতি প্রার্থনং ওঁ বাচ্যতামিত্যনুজ্ঞাতঃ ওঁ পিতৃভ্যঃ স্বধোচ্যতাং ওঁ পিতামহেভ্যঃ স্বধোচ্যতাং ওঁ প্রপিতামহেভ্যঃ স্বধোচ্যতাং ওঁ মাতামহেভ্যঃ স্বধোচ্যতাং ওঁ প্রমাতামহেভ্যঃ স্বধোচ্যতাং ওঁ বৃদ্ধপ্রমাতামহেভ্যঃ স্বধোচ্যতাং ওঁ অস্তু স্বধেতি ব্রাহ্মণৈরুক্তে প্রত্যেকং নমো নম ইতি জলং দদ্যাৎ। ততঃ সপবিত্র কুশসহিত পিণ্ডোপরি বারিধারয়া ওঁ উর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধাস্থ তর্পয়ত মে পিতৃন্ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য সিঞ্চেৎ। ততঃ স্বস্থানস্থিতানেব পিণ্ডান্নত্রীভূয়াঘ্রায় উত্থাপয়েৎ। ততো ন্যুব্জপাত্রমুত্তানী কৃত্য নমোঽদ্যেত্যাদি অমুক গোত্রস্য পিতুরমুক দত্ত দাসস্য অমুক গোত্রস্য পিতামহস্যামুক দত্ত দাসস্য অমুক গোত্রস্য প্রপিতামহস্যামুক দত্ত দাসস্য কৃতৈতৎ পার্ব্বণশ্রাদ্ধ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। এবং মাতামহ পক্ষেঽপি। তত উত্তরা মুখো বামোত্তরীয়ঃ পাতিত দক্ষিণ জানুঃ। নমোঽদ্যেত্যাদি পুরূরবো মাদ্রবসোর্ব্বিশ্বেষাং দেবানাং কৃতৈতৎ পার্ব্বণশ্রাদ্ধ প্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং তন্মূল্যং বা বিষ্ণুদৈবতং যথানামগোত্রায় ব্রাহ্মণায়াহং দদানীতি দক্ষিণাং দদ্যাৎ। ততঃ ওঁ বিশ্বে দেবাঃ প্রীয়ন্তামিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন দৈবে বাচয়েৎ। ওঁ প্রীয়ন্তামিতি প্রতিবচনং। ওঁ দেবতাভ্য ইতি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। তত ওঁ বাজেঽবাজে বত বাজিনো নো ধনেষু বিপ্রা অমৃতা

শ্বাতজ্ঞা অগ্য মধ্ব পিবত মাদয়ধ্বং তৃপ্তা যাত পথিভির্দ্দেবযানৈঃ ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন কুশাগ্রেণ ব্রাহ্মণ স্থান্ পিতৃন্ বিসৃজ্য পশ্চাদ্ব্রাহ্মণস্থান্ দেবান্ বিসর্জ্জয়েৎ। ওঁ আ মা বাজস্য প্রসবো জগম্যা দেমে দ্যাবা পৃথিবী বিশ্ব-রূপে আ মা গন্তং পিতরা মাতরা যুবমা মা সোমোঽমৃতত্বায় গম্যাদিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য প্রদক্ষিণ বারিধারয়া ব্রাহ্মণান্ বেষ্টয়ন্ প্রণমেৎ। ততঃ পিণ্ডান্ গো ঽজ বিপ্রেভ্যো দদ্যাৎ জলে বা ক্ষিপেৎ। শ্রাদ্ধীয় দ্রব্যং ব্রাহ্মণায় দদ্যাৎ জলে বা ক্ষিপেৎ। ততো দক্ষিণ পাণিনা দীপমাচ্ছাদ্য হস্তং প্রক্ষাল্যাচম্য এতৎ কর্ম্মাছিদ্রমস্তু ওঁ অস্ত্বিতি প্রতিবচনং। নমোঽদ্যেত্যাদি এতৎ শ্রাদ্ধ বৈগুণ্য প্রশমন কামো বিষ্ণু স্মরণমহং করিষ্যে। ইতি সংকল্প্য ওঁ তদ্বিষ্ণোরিত্যাদি ব্রাহ্মণেন প.ঠিতে নমো নম ইত্যুচ্চার্য্য। ততো বৈশ্বদেব বলিকর্ম্মণী কুর্য্যাৎ ॥ * ॥ * ॥ * ॥

অথাশৌচান্ত দ্বিতীয় দিন শ্রাদ্ধ প্রয়োগঃ॥ * ॥ ততঃ পূর্ব্বদিনে কৃতক্ষৌরোদ্বর্ত্তনাদিঃ পরদিনে সূর্য্যোদয়ানন্তরং সশিরস্ক স্নানং কৃত্বা ওষ্ঠস্পর্শ রূপং দ্বিরাচমনং কৃত্বা দক্ষিণ হস্তেন লগুড়ং স্পৃষ্ট্বা বৈধ স্নানং কুর্য্যাৎ। ততঃ সূর্য্যায়ার্ঘ্যাদিকং দত্ত্বা দক্ষিণাভিমুখীভূয় কৃতপাদশৌচো দর্ভহস্তঃ প্রাঙ্মুখো দ্বিরাচম্য গোময়োপলিপ্তায়াং ভূমৌ মধ্যাহ্নে তত্রাসামর্থ্যে শ্রাদ্ধপর্য্যদস্তেতর কালে বা দর্ভাসনে চোপবিশ্য তিলতৈলেন দীপং প্রজ্বাল্য নমো বাস্তুপুরুষায় নমঃ ইতি বাস্তুং। সংপূজ্য ওঁ তদ্বিষ্ণোরিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য যজ্ঞেশ্বরং সংপূজ্য শ্রাদ্ধীয়াগ্রভাগং দত্ত্বা পরভূমৌ চেৎ তৎ স্বামিনে মূল্যং অথবা পিতৃরীত্যা ইদমন্নমেতদ্ভূস্বামি পিতৃভ্যো নমঃ ইত্যগ্রভাগং দদ্যাৎ দক্ষিণামুখ দক্ষিণোত্তরীয় পাতিতবামজানুস্তিলপ্রোক্ষিত দক্ষিণাগ্রৈক দর্ভাসনে দর্ভবটুং সংস্থাপ্য নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে আসনং নম ইত্যাসনং দত্ত্বা অত্রাসনে দেবরাজাভ্যনুজ্ঞাতো বিশ্রাম্যতাং দ্বিজবর্য্যানুগ্রহায় চ। প্রসাদয়েত্ত্বাসনং গৃহ্ণপূতং জ্ঞানাগ্নিপূতেন করেণ বিপ্র ইতি পঠেৎ। ছত্রোপানহৌ দদ্যাৎ। নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে ছত্রং নম ইতি ছত্রং॥ নমো ঽমুক গোত্রঃ প্রেতামুক দত্ত দাস এতত্তে উপানহযুগলং দদ্যাৎ। তদশক্তৌ তৎ প্রতিনিধিত্বেন কাষ্ঠপাদুকাদ্বয়ং দদ্যাৎ। ততো ঽনুজ্ঞা বাক্যং। নমো ঽদ্যামুকে মাসামুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য অশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য আদ্যৈকোদ্দিষ্টশ্রাদ্ধং দর্ভময় ব্রাহ্মণেঽহং করিষ্যে। ওঁ কুরুষ্বেতি প্রতিবচনং ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং জপ্ত্বা ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। ততঃ

পুণ্ডরীকাক্ষং স্মৃত্বা মৃজ্জলেন শ্রাদ্ধীয় দ্রব্য প্রোক্ষণং কর্ত্তব্যং রক্ষার্থমুদক পূর্ণপাত্রমেক দেশে স্থাপয়েৎ। ততো ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা নমোঽমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে দর্ভাসনং নম ইত্যনেন ব্রাহ্মণ বামপার্শ্বে মোটকং দদ্যাৎ। ওঁ অপহতেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইতি তিলান্ বিকীর্য্য জলং স্পৃষ্ট্বা ব্রাহ্মণাগ্রভূমৌ কুশপত্রমেকং স্থাপয়িত্বা তদুপরি পাত্রং সংস্থাপ্য ওঁ পবিত্রাসি বৈষ্ণবী ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনখছিন্নং ওঁ বিষ্ণোর্মনসা পূত-মসীতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন প্রোক্ষিতমেকদলং পবিত্রং তৎপাত্রে নিধায় ওঁ শন্নোদেবীরভিষ্টয়ে আপো ভবন্তু পীতয়ে শংযোরভি স্রবন্তু ন ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন জলং তৎ পাত্রে দদ্যাৎ ওঁ তিলোসি সোম দেবত্যো গোসবো দেব নির্ম্মিতঃ। প্রত্নমদ্ভিঃ পৃক্তঃ স্বধয়া প্রেতান্ লোকান্ প্রীণাহি নঃ স্বাহা ব্রাহ্মণেন পঠিতে নমো নম ইত্যনেন তিলাঃ দেয়াঃ। ততুস্তষ্ণীং গন্ধপুষ্পে দত্ত্বা কুশান্তরণাচ্ছাদ্য অচ্ছিদ্রমিদমর্ঘ্য পাত্রমস্তু ইত্যুক্ত্বা ব্রাহ্মণেন পবিত্রং জলান্তরাঞ্চ দত্ত্বা পুষ্পান্তরেণ শিরঃ প্রভৃতি সর্ব্ব গাত্রেভ্যো নম ইতি পূজয়েৎ। ততস্তৎ পাত্রং বামহস্ততলে বিনস্য দক্ষিণ হস্তেনাচ্ছাদ্য ওঁ যা দিব্যা আপঃ পয়সা সংবভূবুর্যা অন্তরীক্ষা উত পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ শংস্যোনাঃ সুহবা ভবন্তু ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এষ তে ঽর্ঘ্যো নম ইত্যনেনার্ঘ্যং ব্রাহ্মণে নিক্ষিপেৎ। তত ওঁ ইহ লোকং পরিত্যজ্য গতোসি পরমাং গতিমিতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্যাবাহয়েৎ। নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতানি তে গন্ধ পুষ্প ধূপ দীপাচ্ছাদনানি নম ইত্যুৎসৃজ্য

ওঁ সর্ব্বঃ সুগন্ধ এবায়ং শীতলঃ সুমনোহরঃ। ময়া নিবেদিতো ভক্ত্যা গন্ধোঽয়ং প্রতিগৃহ্যতাং। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য এষ তে গন্ধ ইতি নিবেদয়েৎ। ওঁ শ্রিয়া দেব্যা সমাযুক্তং দেবৈরপি শিরোধৃতং। ময়া নিবেদিতং ভক্ত্যা পুষ্পমেতৎ প্রগৃহ্যতাং। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য এতত্তে পুষ্পমিতি নিবেদয়েৎ। ওঁ বনস্পতি রসো দিব্যঃ শীতলঃ সুমনোহরঃ। ময়া নিবেদিতো ভক্ত্যা ধূপোঽয়ং প্রতিগৃহ্যতাং ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য এষ তে ধূপ ইত্যুপনয়েৎ। ওঁ সুপ্রকাশো মহাদীপঃ সর্ব্বতস্তিমিরাপহঃ। সবাহ্যভ্যান্তরং জ্যোতির্দীপোঽয়ং প্রতিগৃহ্যতাম্। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য এষ তে দীপ ইতি নিবেদয়েৎ। এতত্ত আচ্ছাদনমিতি বস্ত্রং নিবেদয়েৎ। ততো ব্রাহ্মণাগ্র ভূমৌ কুশাদিকমপনীয় ভস্মনা বারিণা বাপি কারয়েন্মণ্ডলং ততঃ। নৈর্ঋতীমারভ্য দক্ষিণাগ্রান্তয়া রেখয়া ৪০৭
বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা ভোজনপাত্রং নিদধ্যাৎ। তত্র সর্ব্বমন্নাদিকং পরিবেশ্য ওঁ ইদং বিষ্ণুর্ব্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য অন্নাদাবনখমঙ্গুষ্ঠং ক্ষিপেৎ। ওঁ অপহতেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য তিলান্ বিকীর্য্য অন্নে মধু দত্ত্বা তদভাবে গুড়ং দত্ত্বা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ মধুবাতেত্যাদি ওঁ মধু মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো বামহস্তেনান্নপাত্রং ধৃত্বা ব্রাহ্মণে জলগণ্ডূষং দত্ত্বা নমোঽমুক গোত্র প্রেতামুক দত্তদাস এতত্তে হন্নং সোপকরণ সামিষং নম ইত্যুৎসৃজ্য ব্রাহ্মণে জলং দদ্যাৎ। ততঃ সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ত্রিঃ সকৃদ্বা মধুবাতেত্যাদি ওঁ মধু মধু মধ্বিতি ওঁ অন্নহীনং ক্রিয়াহীনং বিধিহীনঞ্চ

যদ্ভবেৎ। তৎ সর্ব্বমচ্ছিদ্রমস্ত্বিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততঃ শ্রব্যং ব্রাহ্মণঃ পঠেৎ। তদ্যথা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং ওঁ মধুবাতেত্যাদি ত্র্যচং ওঁ মধু মধু মধ্বিতি ওঁ যজ্ঞেশ্বর ইত্যাদি ওঁ যোগীশ্বরমিত্যাদি যাজ্ঞবল্ক্যোক্ত শ্লোকত্রয়ং ওঁ তদ্বিষ্ণোরিত্যাদি ওঁ দুর্য্যোধনো মন্যুময় ইত্যাদি ওঁ সপ্তব্যাধা ইত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ততো দক্ষিণাগ্রান্ সতিল দর্ভানাস্তীর্য্য ভূমিং প্রোক্ষ্য সর্ব্ব প্রকারমন্নমুদ্ধৃত্য সতিলমেকী কৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চেত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য তদুক্ত ফলমুদ্দিশ্য দর্ভোপরি দদ্যাৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণ শ্রবণং স্পৃষ্ট্বা বা হরিং স্মৃত্বা ব্রাহ্মণায় জলগণ্ডূষং দদ্যাৎ। ততঃ পূর্ব্ববদ্গায়ত্রীং ওঁ মধুবাতে-ত্যাদি ত্র্যচং ওঁ মধু মধু মধ্বিতি চ ব্রাহ্মণেন পঠিতে নমো নম ইতি জপ্ত্বা। নমঃ শেষমন্নং ক্ব দেয়মিতি পৃচ্ছেৎ। ওঁ ইষ্টায় দীয়তামিতি প্রতিবচনং। নমঃ পিণ্ডদানমহং করিষ্যে ইতি প্রশ্নং কুর্য্যাৎ ওঁ কুরুষ্বেতি প্রতিবচনং। ব্রাহ্মণ সংমুখে ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে হসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নৈর্ঋতীমারভ্য দক্ষিণাগ্রান্তয়া রেখয়া বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং কৃত্বা প্রাদেশ মাত্রং সাগ্রকুশপত্রদ্বয়ং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা বামহস্তান্বারব্ধ দক্ষিণ পাণিনা দক্ষিণাগ্রাং রেখাং মধ্যস্থানে ওঁ অপহতেত্যাদি ওঁ নিহন্মীত্যাদি চ ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য কুর্য্যাৎ। তদ্দর্ভদ্বয়মুত্তরস্যাং দিশি ক্ষিপেৎ। রেখোপরি সমূলান্ সাগ্রান্ কুশা-নাস্তীর্য্য ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য বামহস্তেন ধৃত্বা দক্ষিণ হস্তেন সতিল জলং গৃহীত্বা ৪৫৮

নমোঽমুক গোত্র প্রেতামুক দত্ত দাস অবনেনিক্ষ্ব নম ইত্যনেন কুশোর দদ্যাৎ। ততঃ শ্রাদ্ধশেষেণ পিণ্ডং নির্ম্মায় মধ্বভি ঘারিতং কৃত্বা বামহস্তগৃহীত পাত্রাদ্দক্ষিণ হস্তেন সংগৃহ্য নমো ঽমুক গোত্র প্রেতামুক দত্তদাস এতত্তে পিণ্ডং নম ইতি বামহস্তান্বারব্ধ দক্ষিণ পাণিনা কুশোপরি দদ্যাৎ। ততো ঽমন্ত্রকং করং প্রোঞ্ছ্য আচম্য হরিং ওঁ অত্র প্রেত মাদয়স্ব যথা ভাগমাবৃষায়স্ব ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য বামাবর্ত্তেনোদঙ্মুখো ভূত্বা আগমনাচ্ছ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ ওঁ অমীমদৎ প্রেতো যথা ভাগমাবৃষায়িষ্ট ইতি ব্রাহ্মণেন পঠিতে নমো নম ইতি দক্ষিণামুখো জপেৎ। ততঃ পূর্ব্ববদেবাবনেজনাবশিষ্ট জলেন নমোঽমুক গোত্র প্রেতামুক দত্ত দাস প্রত্যবনেনিক্ষ্ব নম ইতি প্রত্যবনেজয়েৎ। ততো নীবীং বিস্রংস্যাচম্য কৃতাঞ্জলিঃ। ওঁ নমস্তে প্রেত শুষ্মায় ওঁ নমস্তে প্রেত তপসে ওঁ নমস্তে প্রেত যজ্জীবন্তস্মৈ ওঁ নমস্তে প্রেত রসায় ওঁ নমস্তে প্রেত ঘোরায় মন্যবে ওঁ স্বধায়ৈ তে প্রেত নম ইতি কাণ্বশাখিনাং গৌড়ানাং বসন্তাদি ঋতুনমস্কার রূপে ব্রাহ্মণেন পঠিতে নম ইত্যুচ্চার্য্য নবমনবম্বা শুক্লবস্ত্র দশাভবং সূত্রং বামহস্তাদ্দক্ষিণ হস্তেন গৃহীত্বা ওঁ এতদ্বঃ প্রেতাবাস ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য নমো ঽমুক গোত্র প্রেতামুক দত্ত দাস এতত্তে বাসো নম ইতি বাম- হস্তান্বারব্ধ দক্ষিণ হস্তেন পিণ্ডোপরি দদ্যাৎ। ততঃ প্রেতমুদ্দিশ্য পিণ্ডে গন্ধাদিনা পূজয়েৎ। ততঃ ওঁ শিবা আপঃ সন্তু ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য ব্রাহ্মণে জলং দদ্যাৎ ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ সৌমনস্যমস্তু ইতি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য পুষ্পং দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনং। ওঁ অক্ষতঞ্চারিষ্টঞ্চাস্তু ইতি ব্রাহ্মণেন পঠিতে

নমো নম ইত্যুচ্চার্য্য দূর্ব্বাক্তান্দদ্যাৎ ওঁ অস্তিতি প্রতিবচনং। ততস্তিলাজ্যমধু সংযুক্তং জলং গৃহীত্বা নমোঽমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য দত্তমিদমন্নপানাদিকমুপতিষ্ঠতামিতি দদ্যাৎ। ওঁ উপতিষ্ঠতামিতি প্রতিবচনং। ওঁ অঘোরঃ প্রেতো-হস্তিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি বদেৎ ওঁ অস্তিতি প্রতিবচনং। ওঁ গোত্রং নো বর্দ্ধতামিতি ব্রাহ্মণেনোক্তে নমো নম ইতি বদেৎ ওঁ বর্দ্ধতামিতি প্রতিবচনং। ততঃ প্রাঞ্জলিঃ সুমনাস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ বরান্ যাচেত। ওঁ দাতারো নোঽভিবর্দ্ধন্তামিত্যাদি এতাঃ সত্যা আশিষঃ সন্তিতি ব্রাহ্মণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ সন্তিতি প্রতিবচনং। ততঃ সপবিত্র কুশান্ পিণ্ডোপর্য্যাস্তীর্য্য ওঁ উর্জ্জং বহন্তীরিত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য জলং সিঞ্চেৎ। তত পিণ্ডমাঘ্রায়োত্থাপ্য নমো হদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দত্ত দাসস্য কৃতৈতদাদ্যৈকোদ্দিষ্টশ্রাদ্ধ কর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং তন্মূল্যং বা বিষ্ণুদৈবতং যথা নাম গোত্রায় ব্রাহ্মণায়াহং দদানীত্যুৎসৃজ্য দদ্যাৎ। তত ওঁ দেবতাভ্য ইত্যাদি ব্রাহ্মণেন ত্রিঃ পঠিতে নমো নম ইতি জপেৎ। তত ওঁ অভিরম্যতামিতি ওঁ অভিরতোস্মীতি ব্রাহ্ম-ণেন পঠিতে নমো নম ইতি জপেৎ। ওঁ আ মা বাজস্য প্রসব ইত্যাদি ব্রাহ্মণেন পঠিতে নমো নম ইত্যুচ্চার্য্য বারিধারয়া বেষ্টয়েৎ। ততো দক্ষিণ পাণিনা দীপমাচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্য এতৎ কর্ম্মাচ্ছিদ্রমস্তিত্যুক্তে ওঁ অস্তিতি প্রতিবচনং। এতচ্ছাদ্ধবৈগুণ্য সমাধানার্থং বিষ্ণুস্মরণমহং করিষ্যে। ততো বৈশ্বদেব বলিকর্ম্মণী কুর্য্যাৎ॥ * ॥ * ॥